र्णमासं। [illegible] उपपौर्णमासि। इत्यादि। झयः। झयन्तादव्ययीभावाट्टच्वा स्यात्। उपसमिधं।
उपसमि[illegible]त्। [illegible] गिरेश्च सेनकस्य। गिर्यन्तादव्ययीभावाट्टच्वा स्यात्। सेनक।
स्य मते। पूजार्थं उपगिरं। उपगिरि॥ ॥ इत्यव्ययीभावः॥ द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः।
॥ द्वितीयान्तं सुबन्तं समर्थैः श्रितादिभिः प्रकृतिभिः सह वा समस्यते स समासस्तत्पुरुषः। कृष्णं श्रितः। कृष्णश्रि
तः। कालं अतीतः कालातीतः। नरकं पतितः। नरकपतितः। ग्रामं गतः ग्रामगतः। तरंगान् अत्यस्त
तरङ्गात्यस्तः। सुखं प्राप्तः सुखप्राप्तः। सुखमापन्नः सुखापन्नः। गम्यादेरिति। ग्रामं गामी ग्रा

राम

७२

मगामी। ग्रामं गमी। ग्रामगमी। अन्नं बुभुक्षुः अन्नबुभुक्षुः। समर्थ किम्। पश्य कष्टं श्रित स्वं साधुर्नाम। स्व

यं क्तेन। स्वयं क्तेन समस्यते स च प्राक्कं तः। स्वयंकृतं। खट्वा क्षेपे। खट्वा द्वितीयान्तं क्तेन समस्यते निन्दायां। खट्वा

रूढो जाल्मः। नित्यपो किं खट्वामारूढः गुरुः ध्यायः। ईषदकृता। ईषदित्यव्ययमकृदन्तेन समस्यते। ईषत्पिं

गलः। सामि। सामीत्यव्ययं क्तेन समस्यते। सामिकृतं। अर्द्धं कृतमित्यर्थः। कालाः। कालवाचिनो द्वितीया

न्ताः क्तेन समस्यन्ते। अनत्यन्तसंयोगे पि। मासप्रमितः। मासं प्रमितः प्रतिपच्चन्द्रः। अत्यन्तसंयोगे च। क्तेनेति निवृ

त्तं। कालवाचिनो द्वितीयान्ता अत्यन्तसंयोगे समस्यन्ते। मुहूर्त्तं सुखं मुहूर्त्तसुखं। तृतीया तत्कृतार्थेन गु

णवचनेन। तृतीयान्तं समर्थेन तृतीयान्तार्थकृत गुणेनार्थेन च समस्यते। शंकुलया खंडः शंकुलाखं

डः। धान्येनार्थो धान्यार्थः। तत्कृतेनेति किम्। अक्ष्णा काणः। समर्थ किम्। नार्थः शंकुलया खंडो सो ग्रा

वणा। समर्थत्ववृत्तिः सर्वत्र समासे न द्वित्वे वक्तव्या। पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्ल

प्र. सु.
७४
७५

देण ॥ एभिः तृतीया समस्यते। मासेन पूर्वः मासपूर्वः ॥ एवं सदृशादौ। अवरस्येष्टिः ॥ मासावरः ॥ कर्तृ
करणे कृता बहुलम्। कर्तरि करणे वा तृतीया कृदन्तेन समस्यते बहुलं। हरिणा त्रातो हरि
त्रातः। नखैर्भिन्नो नखभिन्नः ॥ अन्नेन व्यंजनं। व्यंजनवाचि तृतीयान्तं अन्नवाचिना समस्य
ते। क्षीरेण सिक्त ओदनः क्षीरोदनः ॥ भक्ष्येण मिश्रीकरणम्। मिश्रीकरणवाचि तृतीयान्तं
भक्ष्येण समस्यते। गुडेन मिश्रा धाना गुडधानाः ॥ चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः
। चतुर्थ्यन्तार्थाय यत् तत्तद्वाचिना अर्थादिभिश्च चतुर्थी वा समस्यते। न तदर्थेन प्रकृतिविकार
भाव एवेष्टिः ॥ यूपाय दारु यूपदारु। अन्यत्र न। रंधनाय स्थाली। अर्थेन नित्यसमासः सर्वलिं
गता च। द्विजायायं द्विजार्थः सूपः ॥ द्विजार्था यवागूः ॥ द्विजार्थं पयः ॥ भूतबलिः ॥ गोहितं। गो

राम
७४

सुखस्त्रागोरक्षितं । पंचमीभयेन । पंचमीभयेनवासमस्यते स तत्पुरुषः । चौराद्भयम् । चौरभयम् । व्या
घ्राद्भयं । व्याघ्रभयम् । भयभीतभीतिभीभिरिति वाच्यं । मृतभीतम् । वृकभीतः । वृकभीतिः । वृक
भीः । वृकल्लोहके ग्रामनिर्गतः । अधर्म्मजुगुप्सुरित्यादि ॥ अपेतापोढमुक्तपतितापत्रस्तैरः ।
ल्पशः । एभिः पञ्चमी क्वचित्समस्यते । सुखादपेतः सुखापेतः । इत्यादि । अल्पशः किं । प्रासा
दात्पतितः इत्यादौ न । विप्रा स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन । एतानि पञ्चम्यन्तानि क्तेन वा
समस्यन्ते । स्तोकान्मुक्तः । अल्पान्मुक्तः । एवमन्तिकार्थदूरार्थयोः । कृच्छ्रान्मुक्तः । पञ्चम्या
स्तोकादिभ्य इत्यलुक् । षष्ठी । षष्ठ्यन्तं समर्थं सुबन्तेन समस्यते वा । राज्ञः पुरुषः । राजपुरुषः
। कृद्योगलक्षणा षष्ठी समस्यत इति वाच्यम् । षष्ठीसमासनिषेधापवादः । व्यासस्य

ग

प्रसु· ७५ 75 ६५

कृतिः। व्यासकृतिः। भारतश्रवणं। याजकादिभिश्च। एतैः षष्ठी समस्यते। वक्ष्यमाणनिषेधा
पवादः। द्विजयाजकः। याजक। पूजक। परिचारक। परिवेषक। स्नातक। अध्यापक। उन्मा
दक। उत्सादक। उद्वर्तक। उत्पादक। होतृ। पोतृ। भर्तृ। ग्रहरणपतियोगेण केन समस्यन्ते इ
ति वाच्यम्। ग्रहगणकः। पत्तिगणकः। न निर्धारणे। निर्धारणे या षष्ठी सा न समस्यते। नृ
णां द्विजः श्रेष्ठः। प्रतिपदविधाना षष्ठ्यां न समास इति वाच्यं। सर्पिषो ज्ञानम्॥ पूरणगुणसु
हितार्थसदव्ययतव्यसमानाधिकरणेन। एतदर्थैः षष्ठी न समस्यते। पूरणे। सताषष्ठः।
गुणे। पटस्य शौक्ल्यं। भावप्रत्ययान्तो गुणवाच्यत्र निषिध्यते। सदा गुणवाचिना न निषे
धः। चंदनगंधः। सुहितं तृप्तिः। फलानां तृप्तः। सत। द्विजस्य कुर्वन्। सतो कुर्वाणः। अव्य

राम ७५

यासतोहहृत्वा।तव्यासतांकर्त्तव्यम्।तव्यतसानुबंधकेन समासोऽन्नवत्येव।द्विजकर्त्तव्यम्।समा
नाधिकरणे।राज्ञो नलुप्य।सति समासे पूर्व्वनिपाता नियमः स्यात्।कस्माधारणः स्यादेव।क्तेन
च पूजायाम्।पूजायां विहितक्तेन षष्ठी न समस्यते।पूजोक्तिरुपलक्षणम्।राज्ञां मतो बुद्धः
पूजितो वा।अधिकरणवाचिना च।क्तेन न समासो न।इदमेषामासितं।मतं तम्भुक्तं वा।क्तेने
ति तिरतं।कर्म्मणि वा।उभयप्राप्तौ कर्म्मणि षष्ठ्या समासो न।आश्चर्यो गवां दोहो गोपके
नात्।तृजकाभ्यां कर्त्तरि।कर्त्तृषष्ठ्यास्तृजकाभ्यां न समासः।भवतः शायिका।शयनं शायिका।रो
गाख्यापास्तिं तु।तृच्कुलं वकुल ग्रहणाद्वात्वर्थनिर्द्देशो ण्वुल्तृचसेयः।कर्त्रर्थ्यवतस्त्रिधाना
त्र्यो योगे कर्त्तृषष्ठीनेति।तस्तुत्तरार्थः।कर्त्तरि किं।इक्षुभक्षिका।कर्त्तरि च।कर्त्रर्थतृजका

प्र.सु.
७६
७५

स्यांषष्ठ्यान समासः। अपांस्रष्टा। वज्रस्यभर्त्ता। पत्यर्थभर्तृशब्दस्य याजकादित्वात्समासः। भूभ
र्त्ता। सतामर्द्धकः। नेति निवृत्तम्। नित्यंक्रीडाजीविकयोः। षष्ठीसमासः। उद्दालकपुष्पभंजिका। जी
विका। यांदंतलेखकः। तदन्त्रनास्ति। वामनमते जीविकायांतजाप्ति। तेनग्रामालंकर्त्तास्यादेत्यात
व्यम्। पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे। पूर्वादयोऽवयववाचकावयविनासमस्यन्ते। एकं
चेद्द्रव्यम्। षष्ठीसमासापवादः। पूर्वकायः। अपरकायः। अधरकायः। एकदेशिना किम्। पूर्वं
नाभेःकायस्य। एकाधिकरणे किं। पूर्वश्छात्राणाम्। सर्वोप्येकदेशेनाह्ना समासः। संख्याविसाय
तिस्नायकात्। मध्याह्नः। सायाह्नः। अर्द्धं नपुंसकं। समांशवाच्यर्द्धशब्दः क्लीबेसवत्तथासमस्य
ते। अर्द्धं पिप्पल्याः अर्द्धपिप्पली। क्लीबे किम्। ग्रामार्द्धः। द्रव्यैकत्व एव। अर्द्धं पिप्पलीनाम द्वितीय

राम
७६

त्तीयचतुर्थतुर्याण्यन्यतरस्यां। एतानि वा नद्वंत। पूरणगुणेति निषेधं बाधित्वा पक्षे षष्ठीसमासः
।द्वितीयं भिक्षायाः द्वितीयभिक्षा। भिक्षाद्वितीयं। एवं तृतीयादि (तुरीयस्यापि) तुरीयभिक्षा। भिक्षा
तुरीयं। प्राप्तापन्ने च द्वितीयया। एते वा नद्वंत। पक्षे द्वितीयासमासः। प्राप्तो जीविकां प्राप्तजीविकः
।जीविकाप्राप्तः। आपन्नजीविकः। जीविकापन्नः। कालाः परमाणिना। परमाणिवाचिना कालाः
समस्यन्ते। मासो जातस्य मासजातः। सप्तमी शौण्डैः। सप्तम्यन्तं समर्थं शौण्डादिभिर्विभाषा समस्य
ते स तत्पुरुषः। अक्षेषु शौण्डः अक्षशौण्डः। सप्तशौण्डधूर्त कितव। व्याड संवीत। प्रवीण अन्तर॥
आधि पटु पंडित। कुशल। चपल। निपुण। कर्त्तृकरणे कृता बहुलमिति बहुलाहे रन्यत्रापि।
द्वितीयादिविभक्तीनां प्रयोगाभावात्समासो ज्ञेयः॥ कुगतिप्रादयः। कुगत्यादयो गतिसंज्ञाः प्रादयश्च

कातन्त्रकृत्सु २

प्रसु ७७ 77

समर्थेन नित्यं समस्यन्ते । सन्पुरुषः । कुत्सितः पुरुषः कुपुरुषः । कु पापेषदर्थयोः । कुत्सितो विप्रः कुविप्रः । कुई षदुष्णं कोष्णम् । गति । ऊरीकृत्वा इति ऊ । रीकृत्य । समासत्वाद्क्त्वा ल्यप् । अत्र च्वि डाच् प्रत्ययान्तानुकरणेति डाः पि समासः । ऊरीकरोति । प्रादि । प्रकृत्य । प्रकरोति । ऊर्यादि च्वि डाचश्च । ऊर्यादयः च्व्यन्ता डाजन्ताश्च गतिसंज्ञाः स्युः । अनुकरणं सत्त । असत । कारिका । अलो । अत्र [illegible] । कतो । मनसा । पुरसा । अस्तं । अदस् एषामव्ययानां प्रादीनां वा गतिश्चेत्यादिभिः सूत्रैः अर्थ विशेषे प्रक्रियायोगे गतिसंज्ञा ज्ञेयाः । अच्छ गत्यर्थवदेषु । अच्छगत्य । अच्छगच्छति । अच्छोद्य । अच्छ वदति । तिरस । उपाजे । अन्वाजे । साक्षात् प्रभृतयः । अस्तं साधाने उरसि । मनसि । मध्ये पदे निवचने वा । एते कृञि मिश्रे रविसमासाः कृञीत्यादिभिर्वा गतिसंज्ञाः ॥ ति रसोन्तरसपां । गतिसंज्ञस्य

राम ७७

तिरसो विसर्जनीयस्य सो वा स्यात्। कुपोः परयोः। तिरः कृत्य। तिरस्कृत्येत्यादि। हस्तेपाणौ। प्राध्वं
जीविकोपनिषत्। एते कृञि हस्ते पाणौ नित्या श्लिभिन्नेयं गतिसंज्ञाः। हस्तेकृत्येत्यादि। प्राद
यो गत्याद्यर्थे प्रथमया। प्रगतः आचार्यः। प्राचार्यः। प्रान्तेवासी। दुर् इति दाकृद्धयोः। दुर्नरः। दुर्नरः।
दुःकृतं। स्वतीपूजायां। सुश्रीः। अतिराजा। अतिशयातिक्रमयोश्च। सर्वत्र। अतिज्ञः। आङीषदर्थे
मिथ्यायोगः। आबद्धं। आमगरं। अत्याद्यः क्रान्ताद्यर्थे द्वितीयया। अतिक्रान्तो मालामिति विग्रहे। ए
कविभक्तिश्चापूर्वनिपाते। विग्रहे यन्नियतविभक्तिकं तदुपसर्जनसंज्ञं स्यात्। ननु तस्य पूर्वनि
पातः। गोस्त्रियोरुपसर्जनस्य। गोन्तस्त्रीप्रत्ययान्तयोरुपसर्जनयोर्ह्रस्वः स्यात्। अतिमालः। अति
गंगः। वेलामुत्क्रान्तः उद्वेलः। मुखमभिप्रपन्नो अभिमुखः। अध्वप्रतिगतः प्रत्यध्वः। विभाषानुवृत्ते

प्र॰सु॰
१८
78

तिरसो विसर्जनीयस्य सो वा स्यात्। कुध्योः परयोः। तिरःकृत्य। तिरस्कृत्येत्यादि। हस्तेपाणौ। प्रा
ध्वं जीविका। उपनिषत्। एते कृञि हस्तेपाणौ विवाहादिमिन्नित्यं गतिसंज्ञाः। हस्तेकृत्येत्यादि॥
प्रादयो गताद्यर्थे प्रथमया। प्रगतः आचार्यः। प्राचार्यः। प्रांतेवासी। दुर् निंदा कृच्छ्रयोः। दुर्नरः
। दुःकृतं। स्वती पूजायां। सुश्रीः। अतिराजा। अतिशयातिक्रमयोश्च सूक्तिः। अतिस्तुतः। आङी
षदर्थेभिव्याप्तौ। आबद्धं। आनगारं। अत्यादयः क्रान्ताद्यर्थे द्वितीयया। अतिक्रांतो मालामिति वि
ग्रहे। एकविभक्ति चापूर्वनिपाते। विग्रहे यन्नियतविभक्तिकं तदुपसर्जनसंज्ञं स्यात् न तु त
स्य पूर्वनिपातः। गोस्त्रियोरुपसर्जनस्य। गोन्तस्त्रीप्रत्ययांतयोरुपसर्जनयोर्ह्रस्वः स्यात्। अति
मालः। अतिगंगः। वेलामुकूलः। उद्वेलः। सुखमाभिप्रपन्नो अभिमुखः। अक्षिप्रतिगतः प्रत्यक्षः

राम
१८

रर्द्धपिप्पलीत्यादौ नोपसर्ज्जनत्वं स्त्रीप्रत्ययान्तत्वाभावात् ॥ अतितरीः । अतितंत्रीः । अतिलक्ष्मीः । अ
तिश्रीः । इत्यादौ ह्रस्वो न । ईयसो बहुव्रीहेर्न्नी । बहुश्रेयसी पुरुषः । अवादयः क्रुष्टाद्यर्थे तृतीयया ॥
अवक्रुष्टः कोकिलया अवकोकिलो वसन्तः । वर्म्मणा संनद्धः संवर्म्मा । अर्थेनानुगतो अन्वर्थः ॥
अर्थेन वियुक्तो व्यर्थः । पर्यादयो ग्लानाद्यर्थे चतुर्थ्या । परिग्लानो ध्ययनाय । पर्यध्ययनः । अलं कुमारिः
निरादयः क्रान्ताद्यर्थे पंचम्या । निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः । उवेन नित्यसमासो विभक्त्य
लोपश्चातातिवा वा सप्तमी इवा । वागर्थाविवाक मर्म्म प्रववनीपानां न समासः । वृत्तं प्रति । पूर्वकाले
कसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन । एते समानाधिकरणेन समस्यन्ते । सतनत्पु
रुषः । पूर्वकालार्थस्य परकालार्थेन । स्नातानुलिप्तः । तत्पुरुषः समानाधिकरणः कर्म्मधारय

भेकार्यनिष्ठत्वेसतीभेकविभक्तिकत्वंकर्म्मधारय

प्र मु॰
७२
७१

समानाधिकरणो पोपधस्तत्पुरुषः सकर्म्मधारयाख्यः॥ पुंवत्कर्म्मधारयजातीयदेशीयेषु। कर्म्मधारये जा
तीयदेशीययोः परतश्च भाषितपुंस्कमनूङ् तत्पूर्वं पुंवत्स्यात्। पुंवत्वात्स्त्रीप्रत्ययलोपः। एकावा
सोशारीव एकशारी। कोपधादेः प्रतिषिद्धः पुंवद्भावः। कर्म्मधारयादौ प्रतिप्रसूयते। पाचकस्त्री
। एवं समभार्या दत्तभार्या। क्षेत्रभार्या सुकेशभार्या। ब्राह्मणभार्या। एवं पाचकजातीया पाचकदे
शीयेत्यादि। सर्वदेवाः। नरपतिः। इत्यादि। उपमानानि सामान्यवचनैः। उपमानोपमेययोः साधर्म्य
वचनैरुपमानानि समस्यन्ते। घन इव श्यामः घनश्यामः। उपमितं व्याघ्रादिभिः सामान्याप्रयोगे
। उपमेयमुपमानैर्व्याघ्रादिभिः समस्यते। पुरुषोऽयं व्याघ्र इव पुरुषव्याघ्रः। सामान्याप्रयोगे किं
। पुरुषो व्याघ्र इव शूरः॥ विशेषणं विशेष्येण बहुलं। भेदकं भेद्येन समानाधिकरणेन बहुलं।

राम
७९

समस्यते। वृक्षकालत्ता। वृङलोम्नः। कृष्णसर्पादौ नित्यं। रामो जामदग्न्य इत्यादौ नाव्वकविद्धा। नीलमु
त्पलं। नीलोत्पलम्। शाकपार्थिवादीनामुत्तरपदलोपश्च। शाकप्रियः पार्थिवः शाकपार्थिवः। देव
पूजको ब्राह्मणो देवब्राह्मणः। नञ्। नञ् समर्थेन सुपा समस्यते। नलोपो नञः। नञो नस्य
लोपः स्यादुत्तरपदे परतः। तस्मान्नुड् विलुप्तनकारान्नञ उत्तरपदस्याजादेर्नुडागमः स्या
त्। अश्वादन्योऽनश्वः। धर्मविरुद्धोऽधर्मः। पापाभावोऽपापं। नञो नलोपस्तिङि क्षेपे। अपचसि त्वं
जाल्म। निषेधार्थनकारे समासत्वात्र लोपाभावो नैकधेत्यादौ ज्ञेयः। आन्महतः समानाधि
करणजातीययोः। महत आकारोऽन्तादेशः स्यात्। समानाधिकरणे पदे जातीये च परे। महा
देवाः। घासकरविशिष्टेष्वपि वाच्यम्। जातीयप्रत्ययादौ तौशिष्टस्याप्यात्वं। महत्या घासो म

स्या ३

प्र॰मु॰
८०

हाधासः महाकरः महाविशिष्टः । तद्धितार्थोत्तरपदसमाहारे च । तद्धितार्थविषये उत्तरपदे च प
रतः समाहारे च वाच्ये दिक्संख्ये एकार्थेन समस्येते स तत्पुरुषः । पूर्वस्यां शालायां भव इति वि
ग्रहे । दिक्पूर्वपदादसंज्ञायां ञः । अस्माद्भवाद्यर्थे ञः स्यादसंज्ञायाम् । कर्म्मधारये पुंवद्भावे च
कृते ञ्निमित्तादिवृद्धिः । पौर्वशालः । उत्तरपदे पूर्वशालाप्रियः । द्विगुसमाहारो नास्ति । संख्या
पूर्वो द्विगुः । तद्धितार्थेत्युक्तस्त्रिविधः सोऽयमपरो द्विगुसंज्ञः स्यात् । पंचसु कपालेषु संस्कृ
तः इति विग्रहे । संस्कृतं भक्षाः । सप्तमीसमर्थात्संस्कृतार्थे यथाविहितं प्रत्ययः स्यात् भक्षा
श्चेद्वाच्याः इत्यण् । द्विगोर्विभक्तिलोपे च कृते । द्विगोर्लुगनपत्ये । द्विगोर्निमित्तं यस्तद्धितोऽन
पत्यार्थः प्राग्दीव्यतीयः तस्य लुक् स्यात् । पंचकपालः पुरोडाशः । अनपत्ये किम् । द्वयोर्मित्रयोर

राम
८०

यस्येद्दे मित्रिः पंचभिर्गोभिः क्रीतः इत्यत्र द्विगोर्लुगनपत्ये। तेन क्रीतं। तेनेति तृतीयांतात् समर्थात् ठञ्
नार्थे यथाविहितं प्रत्ययः स्यादिति ठञ्। अध्यर्द्धपूर्वाद् द्विगोर्लुगसंज्ञायां॥ अध्यर्द्धपूर्वाद् द्विगोः
श्च परस्यार्हीयप्रत्ययस्य लुक् स्यादसंज्ञायां। पंचगुः। उत्तरपदे। पंचगावो धनं यस्य स इत्यत्र द्विगौ
कृते। गोरतद्धितलुकि। गोऽन्तात्तत्पुरुषाट्टच् स्यात् समासान्तः न तु तद्धितलुकि। अवादेशः
तत्रो वा। बहुव्रीहि। पंचगवधनः। समाहारे। पंचानां गवां समाहृता इत्यत्र समासान्ते तत्कृते। द्विगु
रेकवचनं। द्विगोरर्थः समाहारः एकवत्स्यात् स नपुंसकं। पंस्येकवद्भावः स नपुंसकं स्यात्। पंच
गवं। द्विगोरित्यत्र। परमगावाः। देवगवी। अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः। द्विगोरिति।
ङीप्। त्रिलोकी। आवन्तो वा। त्रिखट्वं। त्रिखट्वी। अनो नलोपश्च वा स्त्रियाम्। पंचकर्मं। पंचकर्मी

अहर्ग्रहणाद्द्वंद्वार्थपरवल्लिंगं द्वंद्वतत्पुरुषयोरिति स्त्रीलिंगतायां प्राप्तायां॥

प्र॰मु॰ ८१

।पाद्योदोन।पञ्चपात्रम्।षड्वुर्युगम्।त्रिभुवनं।तत्पुरुषस्यांगुलेः संख्याव्ययादेः।संख्याव्ययादेरंगुलं
तस्य तत्पुरुषस्यात्प्रत्ययः स्यात्।द्वे अंगुली प्रमाणमस्य द्व्यंगुलम्।निर्गतमंगुलिभ्यः निरंगुल
म्।अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः।एभ्यो रात्रेरच्॥चकारात्संख्याव्ययादेः॥अहश्च
रात्रिश्च अहोरात्रम्॥इद्वंद्वः॥एकत्वद्भावात्क्लीवता।अन्यत्र तत्पुरुषः॥रात्राह्नाहाः पुंसि॥ए
ते पुंस्येव॥सर्वा रात्रिः॥सर्वरात्रः॥एकदेशे पूर्वं रात्रेः॥पूर्वरात्रः॥अपरं रात्रेः॥अपररात्रः
॥संख्यातरात्रः॥पुण्यरात्रः॥संख्यापूर्वस्य रात्रिशब्दस्य क्लीवता वाच्या॥द्विरात्रम्॥ अति
रात्रः॥राजाहःसखिभ्यष्टच्॥एतदन्तात्तत्पुरुषाट्टच्स्यात्॥महाराजः॥अतिराजः॥अति
राजी॥कृष्णसखः॥महासखः॥त्रिसखम्॥अह्नष्टखोरेव।अह्नष्टखयोरेव टिलोपः स्यात्॥

राम ८१

न्यत्रानुत्तमाह्नः । द्व्यहः ॥ त्र्यहः ॥ ६ ॥ अहनी संभृतो द्व्यहीनः क्रतुः ॥ अह्नः खः क्रतुसमूहे ॥ अहीनः
क्रतुः ॥ नियमः किं । आह्निकम् ॥ पुत्रिर्द्दे शान्त्रेह ॥ मद्राणां राज्ञी ॥ मद्रराज्ञी ॥ अह्नोऽह्न एतेभ्यः ॥
एतेभ्यः सर्वादिभ्यः परस्य अहन्शब्दस्य अह्नादेशः स्यात् द्विपरे ॥ अह्नोऽदन्तात् ॥ अदन्तपूर्वप
दस्थान्निमित्तात्परस्याह्नोनस्य णः स्यात् ॥ सर्वाह्णः ॥ पूर्वाह्णः ॥ संख्याताह्नः ॥ द्वयोरह्नोर्भवः ॥ अ
गोलुकु । द्व्यह्नः ॥ द्व्यह्नप्रियः ॥ अत्यहः ॥ अदन्तादित्युक्तेर्नेह णत्वं । निरह्नः ॥ अह्न इत्यदन्तग्रहणा
न्नेह । दीर्घाह्नी प्रावृट् ॥ न संख्यादेः समाहारे । उत्तरपदस्याह्नादेशः । द्वे अहनी समाहृते द्व्यहः ॥ त्र्यहः ॥
उत्तमैकाभ्यां च ॥ आभ्यां परस्याह्नादेशो न । उत्तमशब्दोंत्यार्थः पुण्यशब्दमाह । पुण्यसुदिनाभ्या
मह्नः क्लीबतेष्टा । पुण्याहं । सुदिनाहं । एकाहः ॥ संख्याताह इत्यपीष्यते । अग्राख्यायामुरसः ॥ ७

प्र.सु.
८१
82

रोन्नान्नसुरूपात्स्वस्पादग्ररा ख्यायां। अश्वेवारसं। मुखोमएव इत्यर्थः। अनोश्मायःसरसांजा तिसंज्ञयोः
। एतदन्नान्नसुरूपात्स्वसुप्सा ज्ञातोसंज्ञांसपांवा। उपानतमनः। उपानसं। अमृताश्मः। कालायसं॥
मंडूकसरसमिति ज्ञातिः। महानसं पिडाश्मः। लोहितायसं। जलसरसमिति संज्ञा। ग्रामकौटाभ्यां
वतक्ष्णः। आभ्यां तक्ष्णः एव स्यात्सुरूपे। ग्रामतक्षः। कौटतक्षः। अतेः शुनः। अतेः परात् शुन
एव स्यात्। अतिशेवावाराहः। अतिश्वो सेवा। उपमानादप्राणिषु। उपमानवाचिनः शुनष्टच् स्यात्
। अप्राणिषु उपमेयेषु सत्सु। आकर्षः श्वेव। आकर्षश्वः। उपमितं व्याघ्रे इति समासः। अप्राणिषु।
किम्। वानरः श्वेव। वानरश्वा। उपमानादिति किम्। नश्वा। अश्वा। लोपः। उत्तरमृगपूर्वाच्च सक्थ्नः।
एभ्यः परात्सक्थ्नः टच् स्यात्स्वा। उपमानाच्च। उत्तरसक्थम्। मृगसक्थम्। पूर्वसक्थम्। उपमा

राम
८१

नात्वाफलकक्वचमत्सनावोद्विगोः। नौशब्दाद्द्विगोष्टच्स्यात्। द्विनावोसमाहृते द्विनावं। त्रिनावं। पंच
नावप्रियः। तद्धितार्थे। द्वाभ्यां नौभ्यामागतः द्विनावरूप्यः। हेतुमनुष्येभ्य इति रूप्यः। द्विगोर्लुगनप
त्य इत्यनेन तु अचि अजादौ तद्धिते लुक्। अतद्धितलुकीत्येव। पंचभिर्नौभिः क्रीतः पञ्चनौः। अर्द्धा
च्च। अर्द्धात्परतो नाव टच्स्यात्। नावः अर्द्धं अर्द्धनावम्। क्लीबत्वं लोकात्। खार्याः प्राचां। द्विगोरर्द्धा
च्च खार्याष्टच्वा स्यात्। द्विखारम्। द्विखारि। द्विखाधेरेनः। द्विषंराधनः। अर्द्धखारम्। अर्द्धखारी
। द्वित्रिभ्यामञ्जलेः। आभ्यामञ्जलेष्टज्वा स्यात् द्विगौ। द्व्यञ्जलम्। द्व्यञ्जलि। अतद्धितलुकीत्येव। द्वाभ्या
मञ्जलिभ्यां क्रीतः द्व्यञ्जलिः। ब्रह्मणो जानपदाख्यायां। ब्रह्मान्तात्पुरुषाट्टच्स्याज्जनपदसंबंधयो
तकं वेदुपपदं। सुराष्ट्रेब्रह्मा। सुराष्ट्रब्रह्मः। सप्तमीतियोगविभागात्समासः। कुमहद्भ्यामन्यत

प्र.सु.
८३

रस्यो। आमां ब्राह्मणो वा रच्च स्यान्न तु रूपे। कुब्रह्मः। कुब्रह्मा। महाब्रह्मः। महाब्रह्मा। तत्रोपपदं सप्त-
मीस्थं। अस्मिन्नर्तीय धात्वधिकारे कर्मण्यणित्यादौ सप्तमीनिर्दिष्टमुपपदसंज्ञं स्यात्। उपपदम-
तिङ्। उपपदमतिङन्तं समर्थेन नित्यं समस्यते स तत्पुरुषः। कुंभकारः। अतिङ् किं। मा भवानेधानाहा-
रको व्रजति। तुमुन्ण्वुलौ क्रियायामिति सप्तमीनिर्देशात्तिङः तस्योपपदत्वम्। अतिङ्ग्रहणं ज्ञाप-
यति। नाचस्य वनुरतिरिति। नेह गतिकारकोपपदानां कृद्भिः समासः। प्राक्सुबुत्पत्तेरिति सिध्य-
ते। अमैवाव्ययेन। उपपदसमासोऽव्ययेनामैव स्यात्। स्वादुंकारं भुंक्ते। अमा किं। कालो भोक्तुं। तृ-
तीयाप्रभृतीन्यन्यतरस्यां। उपदंशस्तृतीयायामित्यतः प्रभृतीन्युपपदान्यमा वा समस्यन्ते। मूलका-
कोपदंशं भुंक्ते। मूलकेनोपदंशं भुंक्ते। क्त्वा च। क्त्वोपपदानि तृतीयाप्रभृतीनि क्त्वाप्रत्ययेन वा स-

राम
८३

तेन च न कृता। प्र.का.द. ३

मस्यन्ते। उच्चैः स्त्वरया। उच्चैः कृत्वा। उपज्ञोपक्रमं तदाद्याचिख्यासायां॥ उपज्ञोपक्रमयोरादेराख्याने
छायायां तदंतस्तत्पुरुषो नपुंसकं स्यात्। पाणिनेरुपज्ञा पाणिन्युपज्ञं ग्रंथः। तेनादौ कृत इत्यर्थः। नं
दस्योपक्रमः नंदोपक्रमं द्रोणः। तेनादौ उपक्रांत इत्यर्थः। छाया बाहुल्ये। छायांतस्तत्पुरुष
: पूर्वपदार्थबाहुल्ये क्लीबं स्यात्। शलभानां छाया शलभछायं। सभा राजामनुष्यपूर्वा। राजा
मनुष्यपूर्वः सभांतस्तत्पुरुषः क्लीबं स्यात्। इनसभम्। ईश्वरसभम्। राज्ञः पर्यायस्यैवेष्य
ते। तेनेह न। राजसभा। अमनुष्यशब्दो लोके रक्षः पिशाचादीनाह। रक्षःसभं। पिशाचसभम्
। राजामनुष्यपूर्वा किम्। चंद्रगुप्तसभा। अशाला च। संघातार्थया सभया तत्पुरुषः क्लीबं स्या
त्। स्त्रीसभम्। स्त्रीसंघात इत्यर्थः। अशाला किम्॥ धर्मसभा। धर्मशालेत्यर्थः। स्प एणानी गरह

प्र·मु·
८४
84

शासयोरितिवाच्यं । महत्स्थूलं । शाखायां ॥ विभाषासेनासुराछायाशालानिशानाम् । एतदं
तत्पुरुषावाङ्क्लीवं । द्विजसेनं । यवसुरं । कुड्यछायं । गोशालं । श्वनिशं । पक्षे द्विजसेनेत्यादि ।
तत्पुरुषो नञ्कर्मधारय इत्यनुवृत्तेर्नेह । दृढसेनो राजा । असेनं । परमसेना ॥ परवल्लिं
गं द्वंद्वतत्पुरुषयोः ॥ उत्तरपदयोर्द्वंद्वस्य तत्पुरुषस्य च परपदवल्लिंगं स्यात् ॥ कुक्कुटमयूर्याविमे
मे । मयूरीकुक्कुटाविमौ ॥ तत्पुरुषे । अर्द्धपिप्पली ॥ द्विगुप्राप्तापन्नालंपूर्वगति समासेषु न ॥ प
ञ्चकपालः ॥ पुरोडाशः ॥ प्राप्तजीविकः ॥ आपन्नजीविकः ॥ अलंजीविकः ॥ निःकौशांबिः ॥
पूर्ववदश्ववडवौ । एतयोर्द्वंद्वः पूर्ववल्लिंगः ॥ अश्ववडवौ । पक्षे एकवद्भावाद्व्यते । द्वित्व
मतंत्र्यं ॥ अश्ववडवान् ॥ क्रियाव्ययविशेषणानां क्लीवत्वमेकवचनांतत्वं च वाच्यम् । सा

राम
८४

२१

नेत्रमतिहरि ॥ प्रातःकमनीयम् ॥ पथः संख्याव्ययादेः क्लीबत्वम् ॥ त्रिपथं । विपथं । अघपथं
नपुंसकम् ॥ अपथानि तत्पुरुष एव ॥ अपथा नगरी ॥ अर्द्धर्चाः पुंसि वा क्लीबे ॥ अ
र्द्धर्चः । अर्द्धर्चम् । अर्द्धर्चः । अर्द्धर्चम् । एवमष्टापदं । सुव(र्णशतमानं कार्षापणं नाराचाणंगंध
मादनांधकारापराह्णपूर्वाह्णप्रवासः । निर्यासपार्श्वविमानप्रग्रीवप्रवालवाजिपंजराज
स्यप्रविसरतोरणवल्मीकदिवसदिनवासमरादयः) अन्येष्वत इत्यत्र आदित्ययोगवि
भागात्त्वम् । प्रागेकादशेभ्य इति निर्देशाद्वा । एकाधिका दश एकादश ॥ द्व्यष्टनः संख्या
यामबहुव्रीह्यशीत्योः ॥ संख्यायामुत्तरपदे द्व्यष्टनोरात्वं स्यात् ॥ द्व्यधिका दश द्वादश
॥ द्वाविंशतिः । द्वात्रिंशत् । अष्टादश । अष्टाविंशतिः । अष्टात्रिंशत् ॥ बहुव्रीह्यशी

२४ ६३

प्र॰सु॰
८५
85

त्वाः किं ॥ द्वित्राः द्व्यशीतिः ॥ प्राक्शतात्प्रयोगाः ॥ नेह ॥ द्विशतं ॥ अष्टशतं ॥ अष्टनः कपाले हवि
षि ॥ अष्टाकपालः ॥ पुरोडाशः ॥ अष्टनः संज्ञायां ॥ अष्टापदम् ॥ गवि च युक्ते ॥ अष्टागवेन शकटेन
॥ त्रेस्त्रयः ॥ त्रेस्त्रय सङ्ख्यादेशः स्यात्पूर्वविषये त्रयोदश । त्रयोदश । त्रयोविंशतिः ॥ त्र
यस्त्रिंशत् ॥ वहुव्रीहौ तु त्रिदशाः ॥ अशीतौ तु ॥ त्र्यशीतिः ॥ प्राक्शतादित्येव ॥ त्रिश
तं । त्रिसहस्रं ॥ विभाषा चत्वारिंशत्प्रभृतौ सर्वेषां । द्व्यष्टनस्त्रि एषां प्राग्युक्तं वा स्या
च्चत्वारिंशदादौ परे ॥ द्विचत्वारिंशत् । द्वाचत्वारिंशत् ॥ अष्टचत्वारिंशत् ॥ अ
ष्टाचत्वारिंशत् । त्रिचत्वारिंशत् । त्रयश्चत्वारिंशत् । एवं पंचाशत् ॥ षष्टिसप्ततिनव
तिषु ॥ एकादिश्चैकस्य चादुक् ॥ एकादिर्नञ्प्रकृत्या स्यात् । एकस्य चादुगागमश्च ॥ ए

राम
८५

केनन विंशतिः। एकान्नविंशतिः॥ अनुनासिकविकल्पेन पक्षे। एकाद्रविंशतिं। एकोनविं
शतिरित्यर्थः। एवं एकान्नत्रिंश दित्यादि। षषडुत्वं दतृदशधासूत्तरपदादेष्टुत्वं। धासुवा।
वतीति वक्तव्यं। षडधिका दश। षोडशा। षोढा। षद्वा षाडन्न॥ ॥ इति तत्पुरुषः॥ अनेकम
न्यपदार्थे। अनेकं सुवंतमन्यपदस्यार्थे वर्त्तमानं वा समस्यते स बहुव्रीहिः। सप्तमी विशे
षणे बहुव्रीहौ। सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं प्रयोज्यं। प्राप्तमा विसन्नामर्थद्वयं
ग्राम्यसुदकं ग्रामं। प्राप्तोदको ग्रामः। ऊढरथोनड्वान्। उपहृतपशू रुद्रः। उद्धृतौदनास्था
ली। पीतांबरो हरिः। वीरपुरुषको ग्रामः। प्रथमार्थेनुना। वृष्टे देवे गतः। अनेकोक्तेर्बहूना
मपि। नीलमुज्जलं वपुर्यस्य स नीलोज्वलवपुः। समानाधिकरणानां बहुव्रीहिरिष्यते। ने

हरौ पञ्चमि सुंक्त मस्याऽक्रम॥ अत्र ययानां वामः तेष्वेषु खः॥ सप्तमुपमानपूर्वस्योत्तरपदलोपश्च॥
करस्थितं धनं यस्यासौ करधनः॥ खरस्य मुखमिव मुखं यस्य सः खरमुखः॥ संघातविकारष
ष्ठ्याश्चोत्तरपदलोपश्च॥ केशानां संघातः चूडा यस्य सः केशचूडः॥ सुवर्णस्य विकारोऽलंकारो
यस्य सः सुवर्णालंकारः॥ प्रादिभ्यो धातुजस्य वा चोत्तरपदलोपश्च॥ प्रपतितं पर्णमस्य सः प्र
पतितपर्णः प्रपर्णः॥ विगतमन्त्रं यस्मात्॥ विगतान्त्रं व्यन्त्रं॥ नञोऽस्त्यर्थानां वाच्यो वोत्तरपद
लोपश्च॥ अविद्यमाना भार्या यस्य सः अविद्यमानभार्यः॥ अभार्यः॥ अस्ति क्षीरादयश्च॥
अस्ति क्षीरं यस्याः सा अस्तिक्षीरा गौः॥ स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे
स्त्रियामपूरणीप्रियादिषु॥ उक्तपुंस्कात् परस्यानूङः स्त्रीप्रत्ययस्य पुंवत् स्यात् एकार्थे स्त्री

लिंगपदे पर्यन्तुपूरणपां प्रियादेस्वपरतः॥ पुंवद्भावस्त्रीप्रत्ययलोपः॥ गोस्त्रियोरिति परदस्य
ह्रस्वः॥ चित्रगुः॥ रूपवद्भार्यः॥ ऊरू पुंस्कात् किं॥ गंगाभार्यः॥ अनङः किं॥ वामोरुभार्यः॥ पूरणपां
तु॥ अपूरणीप्रमाणपाः॥ पूरणीप्रत्ययांतात् प्रमाण्यन्ताच्च बहुव्रीहेरप्स्यात्॥ कल्याणीप
ञ्चमीपासां रात्रीणां ताः कल्याणीपञ्चमारात्रयः॥ स्त्रीप्रमाणः॥ पुंवद्भावनिषेधोऽप्रत्ययश्च
प्रधानपूरणपामेवोक्तिः पूरणीवाचस्य तु मुख्यत्वं॥ अन्यत्र न चरन्तश्च॥ नद्यन्ताद् दंताच्च ब
हुव्रीहेः कप्स्यात्॥ पुंवद्भावः॥ कल्याणीपंचमीकः पक्षः॥ बहुकर्तृकः॥ अप्रियादिषु किं॥
कल्याणीप्रियः॥ प्रियामनोज्ञाकल्याणी॥ सुभगा॥ दुर्भगा॥ भक्तिः॥ सचिवा॥ स्वसा॥ कान्ता॥
क्षान्ता॥ समा॥ चपला॥ दुहिता॥ वामनो॥ बाला॥ तनया॥ दृढभक्तिरित्यादेः गतजनादेर्दार्ढ्यं॥

वामा॥

प्र·सु·

८७

87

मात्रंविवक्षितं॥नतुस्त्रीत्वेन॥भस्मात्त्वम्।नसिलादिभ्यःकृत्वसुचः॥नसिलादिषुकृत्वसुजंते
षुपरेषुस्त्रियाःपुंवत्स्यात्॥तसः॥तत्राप्यदुत्तरा।पट्वीतमा॥एवंचरट्जातीयचरूस्यदेश्यदेशीय
रूपपाशादौ।त्वतलोर्गुणवचनस्यैवतिवाच्यम्॥पट्व्याभावःपटुत्वं।पट्वीतानेह॥कठित्वंइ
यमनयोरतिशयेनपट्वीपटुतरा।कृत्वस्स्वत्रवकारात्रसिलकृत्वसुज्भमेतभेदेतद्धपिपुंवत्व
।त्वस्याद्धिऋत्यशः।बहुशः।भस्याढेतद्धितेपुंवद्भावः॥हस्तिनीमेनांसमूहोहास्तिकं।अ
हेकिंरोहिणायः।ठकूछसोश्च।भवत्यास्छात्राःभावकाः।भवदीयाः।कुक्कुट्यादीनामंडा
दिषुवा।कुक्कुटांडं।मृगपदं।मृगक्षीरं।काकशावः।काकाण्डानिनोक्ष्व॥एतयोःपरतःपुं
वत्स्यात्॥एतायते।श्येनीवाचरति।श्येनायते।दर्शनीयामात्मानंमन्यते॥दर्शनीयमा।

राम

८७

निनी॥नकोपधायाः॥कोपधायाःऊन्नपुंस्कःस्त्रियानपुंवत्॥पाचिकाभार्यः॥पाचिकात्ता॥पाचिकात्व
म्॥रसिकाभार्यः॥मद्रिकायते॥मद्रिकामानिनी॥अकृत्तद्धितान्तायाःकोपधायाःपुंवद्भावनिषेधः
॥इह माभूत्॥पाकाभार्यायस्यसपाकभार्यः॥संज्ञापूरण्योश्च॥एतयोर्नपुंवत्॥दत्ताभार्यः॥दत्ता
यते॥दत्तामानिनी॥पञ्चमीभार्यः॥पञ्चमीपाशेत्यादि॥वृद्धिनिमित्तस्यचतद्धितस्यारक्त
विकारे॥वृद्धिहेतोस्तद्धितस्यारक्तविकारार्थस्यनपुंवत्॥स्रौघ्नीभार्यः॥माथुरीयते॥मा
थुरीमानिनी॥वृद्धिनिमित्तस्येतिकिम्॥मध्यमभार्यः॥अरक्तेतिकिं॥काषायीकंथयस्येतिका
षायकंथः॥अविकारइतिकिं॥हैमीमुद्रिकः॥वृद्धिनिमित्तत्वाभावादिहपुंवत्॥वैयाकरणभार्यः
सौवश्वभार्यः॥स्वांगाच्चेतोमानिनि॥स्वांगाद्दीकारस्यास्त्रियांविहितस्यनपुंवत्॥सुकेशीभार्यः

स्वांगा किं पटुभार्यः १

प्र॰सु॰
८८
88

अप्रमानितिकिम्।सुकेशमानिनी।जातेश्चाजातेर्विहितोङीप्पुंवत्।ब्राह्मणीमार्यः।अप्रमानिनी
त्यत्र।ब्राह्मणमानिनी।संख्ययाव्ययासन्नादूराधिकसंख्याःसंख्येये।संख्ययार्थयासंख्यया
अव्ययादयःसमस्यन्ते।संख्ययाव्ययासन्नादूराधिकसंख्याःसंख्येये।संख्ययासंख्ययाऽव्ययासन्नादूरा
गणात्।संख्येयेयावहुव्रीहिस्तस्माडुच्स्यात्।नन्वबहुगणात्।टिलोपः।उपगतादशोपदा
उपदेशाः।तिविंशतेर्डिति।विंशतेर्नस्यातिशब्दलोपःस्यात्।डिति।आसन्नविंशाः।अदूर
विंशाः।अधिकचत्वारिंशाः।द्वौत्रयोमानंयेषान्तेद्वित्राः।अर्गलानिति।त्रिंशतः।निखिशानिवर्षाणि
मेत्रस्य।निश्चत्वारिंशानि।निर्गतत्रिंशतोंगुलिभ्यानिखिंशःखड्गः।दक्षिणपूर्वातपार्वं
तरालमित्यर्थः।नामाहरैत्यादेनान्तन्त्रनेदमितिसरूपा।समस्यंतेग्रहणविषयेसरूप
२४ दिङ्नामान्यन्तराले।दिशांनामानिसमस्यन्तेंतरालेवाच्येसवहुव्रीहिः।सर्वनाम्नःपूर्वपुंवद्भाव्य
समासः।२

अवहुगणात्किं।उपवहवः।उपगणाः।अन्यत्वेरविशेषः।संख्येयेकें।आधिकाविंशतिर्गवांसं
ख्यायास्तत्पुरुषस्यडच्।नि ४

८०

पदपरेवतत्पान्न तीयान्तेसरूपप्रहरणमित्यर्थमिथः समस्यते। कर्मव्यतिहारे यात्यदुत्तिशब्दाद
नावह्ममते। अन्येषामपिदृश्यते। अन्येषामपिआषाणाद्दृश्यते दीर्घत्वं। द्विग्रहणात्कर्मव्यति
हारे वकुब्रीहौपूर्वपदस्यदीर्घत्वमात्वंवानवीतिसेयं। इच्कर्मव्यतिहारे। कर्मव्यतिहारे वकु
ब्रीहेरिच्स्यात्समासांतः। तिष्ठद्गुप्रभृतीनिचेत्यव्ययीभावत्वादव्ययत्वं। इच्प्रत्ययस्यतत्रपा
ठात्। केशाकेशि। केशेषुकेशेषुगृहीत्वेदंयुद्धंप्रवृत्तं केशाकेशि। मुष्टामुष्टि। मुष्टीमुष्टि। दंडादंडि।
आगुणः। उवर्णान्तस्य भस्यगुणःस्यात्तद्धिते। अवादेशः। बाहूबाहवि। बाहोबाहविर्इदि
तिवक्तव्यगुणः किं। संज्ञापूर्वकोविधिरनित्यातयथास्यात्। नेनाखांनुवंमितिसिद्धं। अवि
त्। अस्यास्तिसरूपकिं। हलेनमुसलेनानेनसहेतितुल्ययोगेसहेत्यतन्नतीयांतेनसमस्य
यं ७

कर्म २

प्र॰ मु॰ ८९ ४१

तातुल्ययोगे सहबहुव्रीहिः॥ वोपसर्जनस्य॥ उपसर्जनस्य सहस्य सो वा स्यात्॥ सपुत्रः॥ सहैव दशभिः
पुत्रैर्भारं वहति गर्दभीति तुल्ययोगवचनं प्रायिकं॥ सैकः॥ सलोमकः॥ बहुव्रीहौ सक्थ्यक्ष्णोः स्वां
गात्षच्॥ स्वांगार्थयोरनयोः षच् बहुव्रीहौ॥ दीर्घसक्थः॥ पुंडरीकवदक्षिणी यस्यासौ पुंडरीकाक्षः॥
त्रलज्जादौ॥ स्वांगात्किं॥ दीर्घसक्थि शकटं॥ स्थूलाक्षि रिक्षुः॥ अंगुलेर्दारुणि॥ अंगुल्यंताद्बहुव्री
हेः षच् स्याद्दारुण्येव॥ पंचांगुलयोऽस्य तत्पंचांगुलं॥ पंचांगुलिसदृशावयवधान्यादिविक्षेपण
काष्ठमुच्यते दारुणि किं॥ पंचांगुलिर्हस्तः॥ द्वित्रिभ्यां ष मूर्ध्नः॥ आभ्यां परस्य मूर्ध्नः षः स्याद्बहु
व्रीहौ॥ द्विमूर्धः॥ त्रिमूर्धः॥ नेतुर्नक्षत्रे अब्वक्तव्यः॥ मृगो नेता यासां ता मृगनेत्राः रात्रयः॥ पुष्य
नेत्राः॥ अन्तर्बहिर्भ्यां च लोम्नः॥ आभ्यां लोम्नोऽप् स्यात्॥ अन्तर्लोमः॥ बहिर्लोमः॥ नाभेः संज्ञायामप्

राम ८९

थेनो नौ यस्य स पद्मनाभः। पद्मनाभिर्वा। ऊर्णनाभः। नाभिर्वा। अञ्नासिकायाः संज्ञायां नसं चास्थू
लात्। नासिकान्ताद् बहुव्रीहेरच् स्यात्। नासिकाशब्दस्य नसं प्राप्नोति संज्ञायां। ननु स्थूलवं पूर्वा।
त्। पूर्वपदात् संज्ञायामगः। पूर्वपदस्थान्निमित्तात् परस्य नस्य णः स्यात् संज्ञायां। ननु मकार व्यवधा
ने। द्रुरिव नासिके यस्य स्यात् द्रुणसः। खरणसः। संज्ञायां किं। पृथुनासिकः। अगः किं। ऋगयनं॥
स्थूलात् किं। स्थूलनासिकः। खुरखराभ्यां नस्। खुरणाः। खरणाः। पक्षे अच्। खुरणसः। खरणस
ः। उपसर्गाच्च। उपसर्गान्नासिकाया अच् स्यात्। नसादेशश्च असंज्ञायामपि। उपसर्गाद्बहुलं।
उपसर्गस्थान्निमित्तात् परस्य नसो नकारस्य णः स्याद्बहुलं। प्रणसः। उन्नसः। वेर्ग्रो वक्तव्यः। विगता
नासिका यस्य स विग्रः। ख्यश्च। विख्यः। नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम्॥ एभ्यो ह

षो २ पो २

प्र० सु०
९०
90

लिसक्थ्याः। वन्ध्यापाद्या। अहलिः। अहलः। असक्थिः। असक्थः। एवं दुःसुभ्यां॥ प्रज्ञे इति पाठे अशक्तिः। अश
क्तः। नित्यमसिच् प्रजामेधयोः॥ नञ्दुःसुभ्यः प्रजामेधयोरसिच् स्यात् बहुव्रीहौ। अप्रजाः। दुःप्र
जाः। सुप्रजाः। अमेधाः। दुर्मेधाः। सुमेधाः। नित्यग्रहणात् मन्दमेधाः। अल्पमेधाः॥ धर्मादनिच् केवला
त्॥ केवलात् परो यो धर्मशब्दः केवलस्तदन्ताद्बहुव्रीहेरनिच् स्यात्। कल्याणधर्मा। केवलात् किं। पर
मः स्वधर्मो यस्य परमः स्वो धर्मो यस्येति परमस्वधर्मः॥ दक्षिणेर्मा लुब्धयोगे॥ अयं निपात्यते। दक्षि
णे ईर्मं यस्य दक्षिणेर्मा मृगः। व्याधेन क्षतव्रण इत्यर्थः। दक्षिणेर्ममन्यत्र। प्रसंभ्यां जानुनोर्ज्ञुः॥ आ
भ्यां परस्य जानुशब्दस्य ज्ञुरादेशः स्यात्। बहुव्रीहौ। प्रगते जानुनी यस्य प्रज्ञुः। संज्ञुः। ऊर्ध्वाद्वि
भाषा। ऊर्ध्वज्ञुः। ऊर्ध्वजानुः॥ ऊधसोनङ्॥ ह्नरोध्नी। पुंसि तु महोधाः। गोगणः। धनुषश्च। धनुरंता

राम
९०

ज्ञा २

र्बहुव्रीहेरनङादेशः स्यात्। शार्ङ्गं धनुर्यस्यासौ शार्ङ्गधन्वा। वासंज्ञायां। पा। तधन्वा। शतधनुः। जायाया नि
ङ्जायांतस्य बहुव्रीहेर्निङादेशः स्यात्। लोपो व्योर्वलि। धानोरधानोश्च पकारवकारयोर्लोपः स्याद्वलि
परे। पुंवद्भावः। युवतिर्जाया यस्य स युवजानिः। लक्ष्मीजानिः। सरजानिः। इत्यादि। गंधस्येदुत्पूतिसु सु,
रभिभ्यः। एभ्यो गंधस्येकारोऽन्तादेशः स्यात्। बहुव्रीहौ। उद्गंधिः। पूतिगंधिः। सुगंधिः। सुरभिगंधिः॥
आगंतुकस्यैकदेशवचनं तस्य वा। सुष्ठु गंधोऽस्य सुगंधः सुगंधिर्वा। आपणः। अपणः। अल्पाख्यायां॥
अल्पत्वकथने गंधस्य प्राग्वत्। सूपोऽल्पोऽस्मिन्सूपगंधि भोजनम्। आज्यमल्पमस्मिन्नाज्यगंधि
भोजनम्। वेति ग्रंथांतरे। सूपगंधं। घृतगंधं। अल्पपर्यायोऽयं गंधशब्दः। उपमानाच्च। उपमानात्पर
स्य गंधस्य प्राग्वत्। पद्मस्येव गंधोऽस्य पद्मगंधिः। मातान्तरे विकल्पः। पादस्य लोपोऽहस्त्यादिभ्यः।

व्या·सु·
६१
91

हस्त्यादिवर्जितादुपमानात्परस्य पादशब्दस्यांतलोपः स्याद्बहुव्रीहौ। व्याघ्रस्येव पादावस्य व्याघ्रपात्। सिं
हपात्। अहस्त्यादिभ्यः किं। हस्तिपादः। कुसूलपादः। कुंभपदीषु च। कुंभपद्यादिषु पादस्यांतलोपो ङी
ष् निपात्यते स्त्रियां। पादः पत्। कुंभपदी। शतपदी। स्त्रियां किं। कुंभपादः। संख्यासुपूर्वस्य।
संख्यापूर्वस्य सुपूर्वस्य च पादस्यांत्यलोपः स्यात्। द्विपात्। सुपात्। वयसि दंतस्य दतृ। संख्यासुपू
र्वस्य दंतस्य दतृ आदेशः स्यात्। वयसि द्योत्ये बहुव्रीहौ। द्विदन्। द्विदंतौ। द्विदंतः। चतुर्दन्। षषुत्व
मित्सुत्वं ष्टुत्वं च। षोडन्। सुदन्। सुदती। वयसि किं। द्विदंतो गजः। सुदंतो नटः। अग्रांतशुद्धशुभ्र
वृषवराहेभ्यश्च। एभ्यो दंतस्य दतृ वा। कुड्मलाग्रदन्। कुड्मलाग्रदंतः। शुद्धदन्। शुभ्रदंतः। वा
कारान्मूषकदन्। मूषकदंतः। अहिदन्। अहिदंता। इत्यादि। ककुदस्यावस्थायां लोपः। ककुद

राम
६१

स्यांतलोपः स्यादवस्थायां। घोत्पायां। अजातककुत्। पूर्णककुत्। उद्भिन्नां ककुदस्य। आसां परस्य।
काकुदस्यांतलोपः स्यात्। उत्काकुत्। विकाकुत्। काकुदं तालुः। पूर्णाद्विभाषा। पूर्णकाकुत्। पू
र्णकाकुदः। सुहृद्दुर्हृदौ मित्रामित्रयोः। सुहृदयीं हृदयस्य हृद्भावो निपात्यते। सुहृन्मित्रं। दुर्हृदं
मित्रः। अन्यत्र सुहृदयः। दुर्हृदयः। उरःप्रभृतिभ्यः कप्। एभ्यः कप्स्याद्बहुव्रीहौ। परत्र। तद्धित।
त्वान्नक इत्ता। व्यूढोरस्कः। प्रियसर्पिष्कः। इनः स्त्रियाम्। इन्नन्तात्कप्स्यात्स्त्रियाम्। बहुदंडिका। ब
हुवाग्मिका। समानघृतं श्वेति कप्। केणः इति ह्रस्वप्राप्ते। न कपि। कप्प्रत्यये ह्रस्वो न स्यात्। बहुल
क्ष्मीकः। शेषाद्विभाषा। अनुक्तसमासांताद् बहुव्रीहेः कब्वा स्यात्। बहुदंडी। बहुदंडिकः। आपोन्यत
रस्याम्। कपि आवंतस्य ह्रस्वो वा स्यात्। बहुमालाकः। बहुमालकः। अनावंतस्यापि ह्र

॥ सं ज्ञायां ॥ संज्ञायां बहुव्रीहेर्न कप् ॥

स्वावेतिके धितः ॥ सुसोमपाकः ॥ सुसोमपर्कैः ॥ ईयसश्च ॥ ईयसंतात् बहुव्रीहेः कन्न स्यात् ॥ बहवः श्रेयांसो
पस्यासौ बहुश्रेयान् ॥ बह्व्यः श्रेयस्यो यस्य बहुश्रेयसी पुरुषः ॥ वंदितभ्रातुः ॥ भ्रात्रंतान्न कः स्यात् ॥ सूज्ञायां
शोभनो भ्राता यस्य सुभ्राता ॥ अन्यत्र मूर्खभ्रातृकः ॥ सर्वनामसंख्ययोः प्राग्निपातो बहुव्रीहौ वा वाच्यः ॥ सर्व
श्वेतः ॥ त्रिशुक्लः ॥ मिथोऽनयोः समासे संख्या पूर्वं निपतेत् ॥ द्व्यन्यः ॥ अल्पीयसः पूर्वो द्वित्राः ॥ पंचषाः ॥ वा
प्रियस्य पूर्वत्वं ॥ गुडप्रियः ॥ प्रियगुडः ॥ गड्वादेः परा सप्तमी वा वाच्या ॥ गडुः कंठे यस्य गडुकंठः ॥ प्रायिकं चैत
त् ॥ कंठेगडुः ॥ वहेगडुः ॥ गडुवहः ॥ अत्र सप्तम्या अलुक् ॥ निष्ठा ॥ निष्ठान्तं प्राक् प्रयोज्यं ॥ बहुव्रीहौ ॥ विशे
षत्वस्य विवक्षा पूर्वत्वादेनद्वयोः ॥ कृतकटः ॥ जातिकालसुखादिभ्यः परा निष्ठा वाच्या ॥ सकुंजग्धी ॥ सा
रंगजग्धी ॥ मासजाता ॥ सुखजाता ॥ प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ स्तः ॥ अस्त्रघातः ॥ अस्युद्यतः ॥ दंडपाणि

॥ उद्यतासिरित्यादि । प्रयोगबाहुल्यं वाहिताग्न्यादिषु । एषु निष्ठा वा पूर्वं स्यात् । आहिताग्निः । अग्न्या-
हितः । जातपुत्र (पुत्रः) । पुत्रजात इत्यादि । आकृतिगणोऽयं । समस्यमानपदार्थाः पदार्थैकदेशः
स्यात्स तत्पुरुषसंज्ञितो नो बहुव्रीहिः । लम्बकर्णः ॥ इति बहुव्रीहिः ॥ ॥ वार्थे द्वन्द्वः । अनेकं सुबन्तं
वार्थे नः समस्यते । स द्वन्द्वसंज्ञः स्यात् । समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः । तत्रेश्वरं
गुरुं च भजस्वेति प्रत्येकमेकक्रियासंबंधः समुच्चयः । बटो भिक्षामट गां चानयेति एकमेव क्रि-
यान्वयसंबंधोऽन्वाचयः । अन्योन्यापेक्षैकक्रियासंबंध इतरेतरयोगः । संहतिः समाहारः । समुच्च-
यान्वाचयोर्न समासोऽस्ति । असामर्थ्यात् । द्वन्द्वे घि ॥ द्वन्द्वे घिसंज्ञं पूर्वं स्यात् । हरिश्च हरश्च हरिहरौ
। इतरेतरयोगप्राधान्याद्द्विवचनं ॥ अनेकप्राप्तावेकस्य नियमोऽनियमः शेषे । हरिगुरुहराः

हरिहरगुरवः। अजाद्यदन्तं। अजादिपदं अदन्तं च द्वंद्वे पूर्वं स्यात्। ईशकृष्णौ। बहुष्वनियमः। अश्व
रथेन्द्राः। इन्द्राश्वरथाः। अजाद्यदन्तयोर्मिथः समासे घ्यन्तं पूर्वं। इन्द्राग्नी। इन्द्रवायू। नपरः किं। अ
श्वावृषौ। वृषाश्वौ वा। अल्पाच्तरम्। अल्पाच्कं द्वंद्वे पूर्वं स्यात्। शिवकेशवौ। बहुष्वनियमः। शं
खदुन्दुभिवीणाः। वीणाशंखदुन्दुभयः। ऋतुभानां समानाक्षराणां। आनुपूर्व्येण पूर्वनिपातः
। हेमन्तशिशिरवसन्ताः। भरणीकृत्तिकारोहिण्यः। समानाक्षराणां किं। ग्रीष्मवसन्तौ। लघ्वक्ष
रं पूर्वं। कुशकाशं। अभ्यर्हितं च। तापसपर्वतौ। वर्णानामानुपूर्व्येण। ब्राह्मणक्षत्रियविट्शूद्रा
ः। भ्रातुर्ज्यायसः। युधिष्ठिरार्जुनौ। संख्याया अल्पीयस्याः। द्विवदशा वा। द्वादश। राजदन्तादिषु
परम्। एषु पूर्वप्रयोगार्हं परं स्यात्। दन्तानां राजा राजदन्तः। वनस्याग्रे अग्रेवणं। निपादंतुकः शदा

ना। तं।

योर्भिपः समासेद्व्यंतं पूर्वं। इन्द्राग्नी। इन्द्रवायू। तपरः किं। अश्वावृषौ। वृषाश्वौ वा। अल्पाच्तरम्।
अस्यल्पांक्कं द्वंद्वे पूर्वं स्यात्। शिवकेशवौ। वऊभ नियमः। शंखदुंदुभिवीणाः। वीणाशंखदुंदुभयः।
। ऋतुनक्षत्राणां समानाक्षराणां। आनुपूर्व्येण पूर्वनिपातः। हेमन्तशिशिरवसंताः। भरण्यश्च कृत्तिकारो
हिण्यः। समानाक्षराणां किं ग्रीष्मवसंतौ। लघ्वक्षरं पूर्वं। कुशकाशं। अभ्यर्हितं च। तापसपर्वतौ।
वर्णानामानुपूर्व्येण। ब्राह्मणपौ। धर्म्मार्थौ। कामार्थौ। धर्म्मादिषु अनियम इष्यते। अर्थशब्दौ
। अर्थकामौ। अर्थधर्म्मावित्यादि। जायाया जंभावदंभावौ वा निपात्यौ। पत्यौ। दंपती जंपती। जायापती।
यती। अनुवादे चरणानां। चरणानां सोध्वर्युः क्रतुः। तद्द्वंद्व एकवत्। अर्काश्वमेधं। अध्वर्युक्रतु
रिति किं। इषवत्सौ। अनपुंसकमिति किं। राजसूयवाजपेये। अध्ययनतो विप्रकृष्टाख्यानां।

अनुवादे गम्यमाने २ औक्ठककल्पं

अध्वर्युः क्रतुरनपुंसकं। अध्वर्युर्वेदे यस्य विधानं सोध्वर्युः क्रतुः तद्द्वंद्व एकवत्। १२

प्र॰सु
९४
९५

त्र। अध्ययनेन आसन्नसंज्ञानां द्वंद्व एकवत्स्यात्। पदकक्रमकं। अध्ययनतः इति किं। पितापुत्रौ। आसन्ना
नाख्यानामिति किं। याज्ञिकवैयाकरणौ। द्वंद्वश्च प्राणितूर्यसेनांगानां। एषां द्वंद्व एकवत्स्यात्। प्राण्यंग
दंतोष्ठं। तूर्यांगे मार्दंगिकवीणावादकं। सेनांगे। रथिकाश्वारोहं। समाहारस्यैकत्वादेकत्वे सिद्धे पि इ
दं नुप्रकरणं विषयविभागार्थं प्राण्यंगादीनां समाहार एव द्वंद्वः। दधिपयादीनामितरेतरयोग ए

मु५

व। तत्र मगादीनामयत्वं नियम्यते। एतदर्थमिदं प्रकरणं। जातिरप्राणिनां। प्राणिवर्ज्जजातिवा
चिनां द्वंद्व एकवत्स्यात्। धानाशष्कुलि। प्राणिनां तु विट्शूद्राः। द्रव्यजातीनामेकवद्भावः। नेहा रू
परसौ। गमनाकुंचने। द्रव्यविवक्षायां न। यदाह्व सिद्देशादेनिपतितो नाद्रव्यविशेषाणां विवक्षा
भवति नदा जातिशब्दप्रयोगे पि एकवद्भावो न भवति। बदरामलके। विशिष्टलिंगो नदीदेशो ग्रा।

नी२

राम
९४

माः। ग्रामवर्ज्जनदीदेशवाचिनां भिन्नलिंगानां द्वंद्व एकवत्स्यात्त। गंगाशोणं। कुरुकुरुक्षेत्रं। भिन्नलिं

गः किं। गंगायमुने। ग्रामेन्तु जांववशालूकिन्यौ। क्षुद्रजंतवः। क्षुद्रजंतूनां द्वंद्व एकवत्स्यात्। यूकालि

क्षम्। आनकुलात्क्षुद्रजंतवः। येषां च विरोधः शाश्वतिकः। नित्यविरोधवाचिनां द्वंद्व एकवत्स्यात्।

अहिनकुलं। अश्वमहिषं। काकोलूकं। वृकाराम्। पशुशकुनिद्वंद्व एकवद्वा। वप्वा। पशुशकुनि। शू

द्राणामनिरवसितानां। अवहिष्कृतानां शूद्राणां द्वंद्व एकवत्त। रजकतंतुवायं। वहिःकृता

नां तु चंडालमृतपाः। गवाश्वप्रभृतीनि च। यथोच्चारितान्येतानि एकत्वानि साधूनि स्युः॥

गवाश्वं। दासीदासं। गवेडकं। कुब्जवामनं। कुंजकिरातं। पुत्रपौत्रं। श्वचंडालं। स्त्रीकुमा

रं। दासीमाणवकं। उष्ट्रखरं। नागवानं। शाटीप्रच्छदं। कुटीकुटं। मूत्रशकृत्। मूत्रपुरीषं। य।

भगवती

प्रसु॰
९५
95

हस्त्यश्वेदं। मांसशोणितं। दर्भशरं। दर्भपूतिकं। अर्जुनपुरुषं। तृणोलपमित्यादि। विभाषा वृ-
क्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणां। एषां द्वंद्व एकवत्स्याद्वा॥
वृक्षादौ विशेषाणामेव ग्रहणं। चूताशोकं। चूताशोकौ। रुरुपृषतं। कुशकाशं। व्रीहियवं।
दधिघृतं। गोमहिषं। शुकबकं। अश्ववडवं। पूर्वापरं। अधरोत्तरं। पक्षे दधिघृते। गोमहिषा
। फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां बहुप्रकृतिरेव द्वंद्व एकवत्। बद-
राणि चामलकानि च बदरामलकम्। द्विप्रकृतौ तु बदरामलके। रथिकाश्वारोहावित्यादि॥
विप्रतिषिद्धं चानधिकरणवाचि॥ अद्रव्यवाचिनां विप्रतिषिद्धार्थानां द्वंद्व एकवद्वा स्यात्। शी-
तोष्णं। शीतोष्णे। विरुद्धार्थानां किं। कामक्रोधौ। नेह। द्रव्ये तु। शीतोष्णे उदके। नदविपपत्रादी।

तिर

राम
९५

नि। एतानि निकेवलस्य॥ दधिपयसी। इध्मावर्हिषी। निपातनाद्दीर्घः। ऋक्सामे। वाङ्मनसी। अधिकर
णैतावत्त्ववाद्ध्यपरिमाणं वा गोमेनैकवद्भावः। दशदन्तोष्ठाः। आनङ्। ऋतो द्वंद्वे। विद्यायोनिसंबंधा
वाचिनामृदन्तानां द्वंद्वे पूर्वपदस्यानङ् स्यात्। होतापोतारौ। पुत्रे इत्यनुवृत्तेः। पितापुत्रौ। मातापुत्रौ।
देवताद्वंद्वे च। इह पूर्वपदस्यानङ्। मित्रावरुणौ। अनपत्रवायोः प्रतिषेधः। अग्निवायू वाय्वग्नी। एकह
विर्भागित्वे द्वंद्वं इष्यते ब्रह्मप्रजापती त्यादावप्रसिद्धत्वान्नानङ्। ईदग्नेः सोमवरुणयोः। अनयोर्द्वंद्वे
अग्नेरीकारादेशः स्यात्। अग्नेः स्तुत्स्तोमसोमाः। अग्नेः परस्य षत्वं स्यात्। अग्निष्टुत्। अग्निष्टोमः।
अग्नीषोमौ। अग्नेर्दीर्घात्सो~~...~~सोमौ। एवं कौ। अग्नीवरुणौ। इद्वृद्धौ। वृद्धिप्रत्यये दे
अग्नेरिकारादेशः स्यात्। आग्निमारुतं कर्म। आग्निवारुणीमनड्वाहीम्। विष्णोर्न। देवताद्वंद्वे

सो२ ष्यै२ ते२

स्यानङ्। आ ग्नावैष्णवं वरुं। दिवो द्यावा। द्यावाभूमी जनयन्। मातरपितरावुदीचां॥ मातरपितरौ॥
उदीचां किं। मातापितरौ। द्वंद्वाच्चुदषहांतात्समाहारे। चवर्गान्ता दषहान्ताच्च टच् स्यात् समाहारे। वा-
वाक्त्वचं। शमीदृषदं। श्रीस्रजं। वाक्त्विषं। छत्रोपानहं। समाहारे किं। प्रावृट्शरदौ। वृद्धो यू-
ना तल्लक्षणश्चेदेव विशेषः। यूना सह वचने गोत्रं शिष्यते। गोत्रयुवप्रत्ययमात्रकृतमेव चेद्वैरूप्यं वृद्ध-
योः। गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ। वृद्धः किं। गर्गगार्ग्यायणौ। यूना किं। गार्ग्यगर्गौ। तल्लक्ष-
णः किं। गार्ग्यवात्स्यायनौ। स्त्री पुंवच्च। यूना सह वचने स्त्री च वृद्धा शिष्यते। सा च पुंवत्। तल्लक्षण-
मेव वैरूप्यं चेत्। गार्गी च गार्ग्यायणश्च गार्ग्यौ। पुमान् स्त्रिया। स्त्रिया सहोक्तौ पुमान् शिष्यते। स्त्री-
पुंसलक्षणश्चेदेव विशेषः। ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ। तल्लक्षणः किं। कुक्कुटमयूर्यौ

।भ्रातृपुत्रौ स्वसृदुहितृभ्यां। स्वस्रा सहोक्तो भ्राता दुहित्रा सहोक्तो पुत्रः शिष्यते। भ्राता च स्वसा।
च भ्रातरौ। दुहिता च पुत्रश्च पुत्रौ। नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यां। अक्लीबेन सहो।
क्तो क्लीबं शिष्यते। एकत्वमस्य वा लिंगविशेष एव चेत्। शुक्लः कंबलः। शुक्ला दृष्टिः। शुक्लं व
स्त्रं। तदिदं शुक्लं वस्त्रं। तानीमानि शुक्लानि। पिता मात्रा। मात्रा सहोक्तो पिता शिष्यते। पिता च मा।
ता च पितरौ। माता पितरौ। श्वशुरः श्वश्र्वा। श्वश्र्वा सहोक्तो श्वशुरः शिष्यते। श्वश्रूश्च श्वशुरश्च श्व
शुरौ। श्वश्रूश्वशुरौ वा। त्यदादीनि सर्वैर्नित्यं। सर्वैः सहोक्ता त्यदादीनि शिष्यन्ते। स च देवदत्तश्च तौ। त्य
दादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते। इति वाच्यं। स च यश्च यौ। ग्राम्यपशुसंघेष्वतरुणेषु।
स्त्री। ग्राम्यपशुसंघेषु स्त्री शिष्यते। न तरुणेषु। गाव इमाः। अजा इमाः। ग्राम्य इति किं। रुरव इमे

पञ्चसु किं ब्राह्मणा इमे। संख्येषु किं। एतावन्तो वा। अन्तःकरणेषु किं। वत्सा इमे। अनेकशफेषु किं। त्रिवाद्यं।
नेता। अश्वा इमे। इति द्वंद्वः। अक्रूरबभ्रूपण्यामानन्ते। एषामव्ययपः स्यात्समासान्तः। ३१ करस्तु अनन्ते।
अर्द्धर्चाः। अर्द्धर्चाः पुंसि चेति पुंस्त्वम्। अन्नवव द्वन्द्वात्पथोतर्थ्यवा नेहा। अनकामा वह्नद्वत्त त्क्तं। वि
रूपुरं। विमलापं। सरः। ह्रस्वरूपसर्गम्योपईतत्। एभ्यो ऽपोकारस्येत्। द्विर्गता आपो स्मिन्निति
द्वीपं। अन्तरीपं। अपः प्रतिप्रतीपं। केवि समापो देवयजने। अवर्णान्तेष्वपत इति केचित्। प्रा
पं। अवापं। नुदनोर्द्देशे। अनोप्यरस्याऽपोऽकारस्य ऊत्स्याद्देशे। अनूपः। इन्नुगतः। अनूपो देशः। राजधु
रं। अक्षेतु अनक्षः। दृढधूरक्षः। सखिपथः। रम्यपथो देशः। महापथः। दक्षिणापथः। चतुष्पथं।
उपपं। अव्ययपूर्वात्सामलोम्नः। एभ्यः परात्सामलोम्नश्च मव्ययपः स्यात्समासे। प्रति।

सामं। अनुसामं। अवसामं। एवं प्रतिलोमादिषु। स्योदक्यं तु से ख्या पूर्वाया न्नमेरजिष्यते। द्व्यन्नमः। उ
दगन्नमः। पाण्डुन्नमः। द्विन्नमः। त्रिन्नमः॥ प्रमादः। संख्याया नदीगोदावरीभ्यां च। पञ्चनदं। सप्तगोदा
वरं। अप्रमत्रापीष्यते। पञ्चनामः। कर्णनामः। दीर्घरात्रः। वर्षारात्रः। अह्नो दर्शनात्। अचतुः पर्य्याया
दद्रोणः। वस्यान्त मासे। गवामश्वीवगवात्तेः। ब्रह्मसु पितृविप्राख्याः। अचतुरविचतुरसुचतुरस्त्रीपुंसधेनु
नडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिः
श्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः। अवसप्तमी तियो
गविसमासात्समासे। तुरेतिस्त्रेणाः नञ्राः। पञ्चविंशतिर्निपात्यन्ते। आद्यास्त्रयो बहुव्रीहयः। अविघमा
नाभित्वात् पर्य्यस अचतुरः। विचतुरः। सुचतुरः। सुपाभ्यां चतुरोऽनिष्यते। त्रिचतुराः। उपचतुराः। ततनए

अ च २

प्र·मु·
९८
98

कादशाद्वंद्वाः। स्त्रीपुंसौ। धेन्वनडुहौ। ऋक्सामे। वाङ्मनसे। अक्षिभ्रुवं। दारगवं। ऊर्वष्ठीवं। निपातनाट्टिलो
पः। पदष्ठीवं। निपातनात्पद्भावः। नक्तंदिवं। रात्रिंदिवं। अहर्दिवं। अहन्यहनीत्यर्थः। रजसा सकलं। त्रीतिसा
कल्येऽव्ययीभावः। सरजसं। निश्चितं श्रेयो निःश्रेयसमिति कर्मधारयः। पुरुषस्यायुषं पुरुषायुषमिति त
त्पुरुषः। ततो द्विगुः। द्व्यायुषं। त्र्यायुषं। ततो द्वंद्वः। ऋग्यजुषं। ततस्त्रयः कर्मधारयाः। जातोक्षः। महोक्षः। वृद्धो
क्षः। शुनः समीपमुपशुनं। गोष्ठश्वः। ब्रह्महस्तिभ्यां वर्चसः। ब्रह्मवर्चसं। हस्तिवर्चसं। पल्यराज
भ्यां च। पल्यवर्चसं। राजवर्चसं। अवसमंधेभ्यस्तमसः। एभ्यस्तमसोऽच् स्यात्। अवतमसं। संतम
सं। अंधतमसं। श्वसो वसीयःश्रेयसः। श्वोवसीयसं। श्वःश्रेयसं। शुभमार्यविती। अन्ववतप्ताद्रहसः।
अनुरहसं। अवरहसं। तप्तरहसं। प्रतेरुरसः सप्तमीस्थात्। प्रतेः परात्सप्तमीस्थादुरसोऽच् स्यात्। उरसि प्रतिव

राम
९८

ल्प ३

त्त्वेति प्रत्युरसं। विनक्षत्रेर्षस्य पीत्वा वः। अनुगवमायामे। एतन्निपात्यते दीर्घत्वे। अनुगवं यानं। दीर्घमित्य
र्थः। यस्य चायाम इति समासः। उपसर्गादध्वनः। प्रगतो ध्वानं प्राध्वो रथः। न पूजनात्। पूजार्थस
र्वेभ्यः समासान्ता न स्युः। सुराजा। अतिराजा। स्वतिभ्यामेव। नेह। परमराजः। पूजनात् किं
गामतिक्रान्तो ऽतिगवः। बहुव्रीहौ सक्थ्यक्ष्णोरिति न निषेधः। सुसक्थः। स्वक्षः। किमः क्षेपे। क्षेपार्था
त्किमः परस्य समासान्तो न स्यात्। किंराजा। नञस्तत्पुरुषात्। नञ्पूर्वात्तत्पुरुषात्समासान्तो न स्या
त्। असखा। अराजा। तत्पुरुषात्किं। अनृचो माणवकः। अधुरं। पथो विभाषा। नञ्पूर्वात्पथो वा
समासान्तः। अपथं। अपन्थाः। तत्पुरुषादित्येव। अपथो देशः। अपथं वर्त्तते। लुंपेदवश्यमः कृत्ये
तुं काममनसोरपि। समो वा हिततयोः। मांसस्य पचि युड्घञोः। अवश्यसेव्यः। गन्तुकामः। गन्तु

सा। मांसप१२ने१

सा१

प्र. मु

मनाः। संहितः। सहितः। संहितः। संहितः। संततः। सततः। समो ऽसंपवने। मांसपाकः। मांस्पाकः। कामंमन
साः। समो न लोप इति केचित्। सकामः। सममनाः। उदकस्योदः संज्ञायां। उदकस्योदादेशः स्यात् संज्ञायामुत्तरपदे। उदमेघः। उदवाहः। उत्तरपदस्यापि। उदमेघो नाम यस्य स उदमेघि पुत्रः। लोहितोदः। क्षीरोदः। पेषंवासवाहनधिषु च। उदपेषं पिनष्टि। एषु लं ततः। उदवासः। उदवाहनः। उदधिः। एकहलादौ पूरयितव्ये ऽन्यतरस्यां। असंयुक्तहलादौ परे उदकस्योदादेशः स्याद्वा। उदकुंभः। उदपात्रं। उदककुंभः। एकेति किं। उदकस्थाली। पूरणीये किं। उदकपर्वतः। मंथौदनसक्तुबिंदुवज्रभारहारवीवधगाहेषु च। एषूदकस्योदादेशो वा। उदमंथः। उदकमंथः। इत्यादि। पादस्य पदाज्यातिगोपहतेषु। एषु परेषु पादस्य पद्भावः स्यात्। पदाजिः। पदातिः। पदगः। पदोपहतः। इको ह्रस्वो ऽङ्यो गालवस्य। अङ्यंतस्य इको ह्रस्वो

९९

५१

राम

९९

वा॥ ग्रामणिपुत्रो ग्रामणीपुत्रः ॥ इयङुवङ्‌व्ययानां प्रतिषेधः ॥ श्रीमदः ॥ स्वयंभूपुत्रः ॥ भ्रूलंगाः ॥ स्त्रुघ्नीमादः ॥
अत्रत्यस्य तु गार्गीपुत्रः ॥ ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे ॥ ष्यङः तस्य संप्रसारणं स्यात्पुत्रपत्योस्तत्पु
रुषे परतः ॥ पूर्वरूपत्वं संप्रसारणस्य ॥ संप्रसारणस्य ॥ तस्य दीर्घः स्यात् उत्तरपदे कौमुदगन्ध्यापुत्रः कौ
मुदगंधीपतिः ॥ व्यवस्थितविभाषयात्र ह्रस्वो न । एकतद्धिते च ॥ एकस्य ह्रस्वः स्यात्तद्धिते उत्तरपदे च ॥

कादी
८

एकस्यागतः एकता । ङ्यापोः संज्ञाछन्दसोर्बहुलं ॥ कुमारि रेवतिमित्रः ॥ इष्टकेषीकामालानां चित
तूलभारिषु ॥ इष्टकादीनां चितादिषु परेषु ह्रस्वः स्यात् ॥ इष्टकचितं ॥ इषीकतूलं ॥ मालभारी ॥
तदन्तस्यापीष्यते ॥ पक्वेष्टकचितं ॥ ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचन
बंधुषु ॥ एषु परेषु समानस्य सः स्यात् ॥ समानं ज्योतिरस्य सज्योतिः ॥ इत्यादि ॥ पिंडगोधलोहितकुक्षिव

ग 2

णीपत्नीपत्नेव पीतिकेविता। सपिंड इत्यादि। चरणे ब्रह्मचारिणि। ब्रह्मचारिणि परपदे समानस्य सः स्यात्
व्रतं चरणं गम्यं। सब्रह्मचारी। तीर्थे ये। यप्रत्ययान्ते तीर्थे प्राग्वत्। सतीर्थ्यः। विभाषोदरे। यांते तु उदरे प्राग्व
त्। सोदर्यः। समानोदर्यः। रूपनामगोत्रस्थानवर्णवयोवचनधर्मजातीयेष्विति वित्त। सरूपः। स
मानरूप इत्यादि। दृग्दृशवतुषु। एषु समानस्य सः स्यात्। सदृक्। सदृशः। दृक्षे चेति। सदृक्षः। वतुरुक्त
रार्थः। इदंकिमोरीश्की। इदम ईश् किमः की स्यात् दृग्दृशवतुषु। ईदृक्। ईदृशः। कीदृक्। कीदृक्षः। एवं
न्तु दीक्षः। रणं वक्तव्ये। आ सर्वनाम्नः। एषु सर्वनाम्न आकारोन्तादेशः स्यात्। तादृक्। तादृशः। तादृक्षः। दीर्घः स
तोऽन्ये अमूदृक् अमूदृशः। अमूदृक्षः। विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये। अनयोः सर्वनाम्नश्च टेरद्रि आ
देशः स्यात् अप्रत्ययांते अंचतौ परे। विष्वद्र्यङ्। देवद्र्यङ्। तद्र्यङ्। यद्र्यङ्। अमुमुंचति अदद्र्यङ्। अदसो

दृदो वेति ५
कीदृशः ५
राम
१००

आदेशस्य र अदसो सेरिति सुत्वाव इष्यते। परतः के विद्धिकं निके विद्धिकंति पूर्ववतः। अनयोः के विद्धिकं
ति के विद्धिकंति वा अनयोः। अद मुयङ्। अविशेषादुमयत्रा पीत्य परे। अमुमुयङ्। आदा वित्यस्य अमुय
ङ्। अप्रत्यये किम्। विष्वग्यवः। समः सम् अमि। अप्रत्ययान्ते वा तोपरे समः समि रादेशः स्यात्। सम्यङ्।
सहस्य सध्रिः। सध्र्यङ्। अषष्ठ्याततीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु
। अन्यस्य षष्ठस्य दुगागमो वा स्यात्। आशीरादिषु परेषु। अन्यदाशीः। अन्यदाशा। अन्यदास्था। अन्यदास्थि
तः। अन्यदुत्सुकः। अन्यदूतिः। अन्यत्कारकः। अन्यद्रागः। अन्यदीयः। अषष्ठ्यततीयास्थस्येति किम्।
अन्यस्य अन्येन वा आशीः। अन्याशीः। कारके छोरिष्यत एव। अन्यस्य कारकः। अन्यत्कारकः। अन्य
स्य दम् अन्यदीयः। गहादित्वाच्छः। अर्थे विभाषा। अन्यदर्थः। अन्यार्थः। कोः कत् तत्पुरुषेऽचि। कुइत्सास्य

पृ॰मु॰
१०१
101

कद्वदेशः स्यात् ।कदन्नं ।तत्पुरुषे किम् ।कूष्ट्रो राजा ।अचीत्येव ।कुपुरुषः ।त्रौ च ।कुत्सितास्त्रयः कत्त्रयः
।रथवदयोश्च ।कद्रथः ।कद्वदः ।तृणे च जातौ ।कत्तृणं ।जातौ किम् ।कुत्सितानि तृणानि कुतृणानि ॥
का पथ्यक्षयोः ।कोः कादेशः स्यात् पथ्यक्षयोः ।कापथः ।काक्षः ।कुपथापीतिके वित् ।ईषदर्थे च ।ई
षज्जलं ।काजलं ।विभाषा पुरुषे ।कुपुरुषः ।कापुरुषः ।कवं चोष्णे ।ईषदुष्णं कोष्णं कवोष्णं ।च
कारात्क कदुष्णं ।अग्न्याव पीतिके वित् ।कवाग्निः ।कदग्निः ।काग्निः ।पृषोदरादीनि यथोपदिष्टं ।एता
नि यथोपदिष्टान्येव साधूनि ।पृषदुदरं पृषोदरं ।भवेद्वर्णागमाद्धंसः ।सिंहो वर्णविपर्ययात् ।गू
ढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरं ।मह्यामतिशयेन रौतीति मयूरः ।रौतेरच् टिलोपः महीश
ब्दस्य मयूभावः ।आकृतिगणोऽयं ।नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ।क्विबन्तेषूत्तरपदेषु पू

राम
१०१

ऽस्य दीर्घः स्यात्। उपानत्। नीवृत्। प्रावृट्। मर्म्माविध्। नीरुक्। ऋतीषहं। परीतत्। वनगिर्योः संज्ञा-
यां कोटरकिंशुलकादीनां। कोटरादीनां वने परे किंशुलकादीनां गिरौ परे दीर्घः स्यात्। किंशु-
लकागिरिः। वनं पुरगे मिश्रका सिध्रका सारिका कोटराग्रेभ्यः। एभ्यो वनस्य णत्वं स्यात्। पुर-
गावणं। कोटरावणं। अग्रेवणं। इत्यादि। एभ्यः किं। कुवेरवनं। उपसर्गस्य घञ्यमनुष्ये बहुला-
म्। प्रादे बहुलं दीर्घ स्याद् घञन्ते परे परिहासः। परीहासः। अमनुष्ये किं। निषादः। शुनो दंतदंष्ट्रा-
कर्णकुंदवाराहपुच्छपदेषु दीर्घो वाच्यः। श्वादन्तः। श्वाश्वापदमित्यादि। प्रनिरन्तःशरेक्षुप्लक्षा-
म्रकार्ष्यखदिरपीयूक्षाभ्यो संज्ञायामपि मतौ बह्वचो नजिरादीनां। बह्वचो दीर्घः स्यान्मतौ परे सं-
ज्ञायां। अमरावती। पुष्करावती। शरादीनांच एषां दीर्घः पूर्वविषये। शरावती। वंशावती। एषा

२

102

वनस्य णत्वं स्यात्। प्रवणं। एवं निर्वणादि। विभाषौषधिवनस्पतिभ्यः। एतद्वाचिभ्यः परस्य वनस्य
नस्य णत्वं स्याद्वा। दूर्वावणं। मूर्वावणं। शिरीषवणं। बदरीवणं। पक्षे दूर्वावनमित्यादि। द्वित्र्य
क्षरेभ्य एवेति नेह। देवदारुवनं। इरिकादिभ्यो न। इरिकावनं। मिरिकावनं। वाहनमाहितात्। आ
हितोपितमुच्यते तद्वाचिनिमित्तात्परस्य वाहननकारस्य णत्वं स्यात्। इक्षुवाहणं। श
रवाहणं। पानं देशे। पूर्वपदस्थान्निमित्तात्परस्य नकारस्य णत्वं स्यात्। देशे गम्ये। क्षीरपाणा
:उशीनराः। सुरापाणाः। प्राच्याः। वा भावकरणयोः। प्रागुक्तान्निमित्तात्परस्य भावे करणे च
विद्यमानस्य पानस्य वा णत्वं स्यात्। क्षीरपाणं। क्षीरपानं। करणे क्षीरपाणं क्षीरपानं पात्रं।
गिरिनद्यादीनां वा। गिरिणदी वक्रणदं वक्रणदी। पक्षे गिरिनदीत्यादि। प्रातिपदिकान्तनु

राम
१०२

म्नविभक्तिषु च। पूर्वपदस्थान्निमित्तात्परस्य एषु स्थितस्य नस्य णत्वं वा स्यात्। प्रातिपदिकान्ते माषवापिणौ।
नुमि व्रीहिवापाणि। विभक्तौ माषवापेण। माषवापेनेत्यादि। समासे सति प्रातिपदिकान्तस्यैवेष्यते। ने
ह। माषाणां वापिनी माषवापिनी। समासे स्यादेव माषान्वपतीति माषवापिणौ। माषवापिनौ।
पुवा। टेनी। रस्यपूर्वा। रस्यपदेके नारस्याज्ञा॥ एकाजुत्तरपदे णः। पुनर्णत्वविग्रहणं नित्यत्वार्थं। वृत्रह
णौ। हरिमानयतीति हरिमाणौ। नुमि क्षीरपाणि। विभक्तौ क्षीरपेण। रस्यपिणा। कुमति च। कव
र्गवत्युत्तरपदे च प्राग्वत्। हरिकामिणौ। हरिकामिणी। श्रीकामिणी। श्रीकामेण। असमासे तु। गा
र्गीणां भगिनी। गार्ग्यभगिनी। पदव्यवायेपि। पदेन व्यवधानेपि णत्वं न स्यात्। माषकुम्भवापेन। चतु
रंगयोगेन। अतद्धित इति वाच्यं। आर्द्रगोमयेण। शुष्कगोमयेण। पारस्करप्रभृतीनि च संज्ञायां।

गतानि सप्तुष्याणि नितेषु तातं ते ना त्रिपारस्करः। किष्किंधा। प्रायश्चित्तं। वनस्पतिः इत्यादि। अन्येषा
मपरस्परं। आकृतिगणोयं। अधःशिरसी पदे। अनुत्तरपदयोरनयोर्विसर्जनीयस्य सः स्यात्पदशब्दे प
र। समासे। अधस्पदं। शिरस्पदं। अन्यत्र शिरसः पदं। अनुत्तरपद इति किं। परमशिरःपदे इति समा
संता। पंचम्याःस्तोकादिभ्यः। स्तोकादिभ्यः परस्याः पंचम्या अलुक् स्यात् उत्तरपदे। समासे प्राप्तो लु
गिति विधीयते। स्तोकान्मुक्तः। एवं अंतिकार्थदूरार्थकृच्छ्रेभ्यः। उत्तरपदे किं। निस्त्रान्तः स्तोकात् निस्तोकः।
ओजःसहोंभस्तमसस्तृतीयायाः। ओजसः सहस् अंभस् तमस् एभ्य उत्तरस्यास्तृतीयाया अलुक्
स्यात्। ओजसाकृतं। मनसः संज्ञायां। मनसागुप्ता। संज्ञायां किं। मनोदत्ता। आज्ञायिनि च। मन
सस्तृतीयाया अलुक् स्यात् आज्ञायिन्युत्तरपदे परे। मनसा ज्ञातुं शीलं यस्य स मनसाज्ञायी। आत्मन

श्चपूरणे। पूरणार्थे परपदे आत्मनस्तृतीयाया अलुक्। तृतीयेति योगविभागात्समासः। आत्मनापंचमः।
आत्मनाषष्ठः। प्रकृत्यादिभ्यश्च। प्रकृत्याभिरूपः। वैयाकरणाख्यायां चतुर्थ्याः। आत्मनश्चतुर्थ्या अलुक्स्या
त् वैयाकरणाख्यायां। आत्मनेपदं। आत्मनेभाषा। अलुग्विधिसामर्थ्यात् चतुर्थीसमासः। परस्य च। परस्मै
पदं। परस्मैभाषा। हलदन्तात्सप्तम्याः संज्ञायाम्। हलन्तादादन्तादलुक्स्यात्संज्ञायाम्। गवियुधिभ्यां
स्थिरः। आभ्यां स्थिरस्य सकारस्य षः स्यात्। गविष्ठिरः। युधिष्ठिरः। युधिष्ठिरः। त्वचिसारः। अदन्ता
त्। अरण्येतिलकाः। अत्र संज्ञायां विषये सप्तमी सुपा नित्यं समस्यते। इति सप्तमीसमासः। हृद्युभ्यां। हृ
दिस्पृक्। दिविस्पृक्। मध्याद्गुरौ। अत्रापि प्राग्वत्। मध्येगुरुः। अन्ताच्च। अन्तेगुरुः। अमूर्द्धमस्तकात्स्वां
गादकामे। स्वांगात्सप्तम्या अलुक्स्यात्। कंठेकालः। उरसिलोमः। उदरेमणिः। अमूर्द्धमस्तकात्किं। मू

ष्टे शिखः। मस्तकशिखः। अकामे किं मुखेकामो मोयस्य मुखकामः। बंधे च विभाषा। बंधे परपदे परे सप्तम्या
अलुक्। चक्रेबंधः। चक्रबंधः। हस्तेबंधः। हस्तबंधः। सिद्धशुष्कपक्वबंधेष्वा। इति समासमा। तत्पुरुषे कृति
बहुलं। कृति परपदे सप्तम्या अलुग्बहुलं। तत्पुरुषे। स्तंबेरमः। कर्णेजपः। अत्र न स्यात् कुरुचरः। उपपा
दमतिङ् इति समासः। प्रावृट्शरत्कालदिवां जे। जे परपदे सप्तम्या अलुक्। प्रावृषिजः। शरदिजः। काले
जः। दिविजः। विभाषा वर्षक्षरशरवरात्। एभ्यो जे परे अलुग्वा। वर्षेजः। वर्षजः। इत्यादि। घकालतनेषु
कालनाम्नः। घसे तकाला शब्दे तनेव कालनाम्नः सप्तम्या अलुग्वा। पूर्वाह्णेतरां। पूर्वाह्णकाले। पूर्वाह्णे
तनः। पक्षे पूर्वाह्णतर इत्यादि। शयादि। हलदन्तादित्येव। वासवासिष्वकालात्। एषु परेषु अकालवाचिनः
सप्तम्या अलुग्वा। खेशयः। ग्रामेवासः। ग्रामेवासी। पक्षे खशय इत्यादि। हलदन्तादित्येव नेह। न मिश्र

का 2

यः॥ अवाला किं। पूर्वाह्णशयः। अपोयो निजमतिषु। अप्सुयोनिः। अप्सुजः। अप्सुमतिः। षष्ठ्या आक्रोशे। आ
क्रोशे गम्यमाने षष्ठ्या अलुक् स्यात्। चौरस्यकुलं। निंदायां किं। ब्राह्मणकुलं। वाग्दिक्पश्यद्भ्यो युक्तिदंडह
रेषु। वाचोयुक्तिः। दिशोदंडः। पश्यतोहरः। आमुष्यायणः। देवानांप्रियः इति च सूर्षे। शुनःशेपपुच्छलां
गूलेषु शुनः। शुनःशेपः शुनःपुच्छः शुनोलांगूलः। पुत्रेऽन्यतरस्यां। पुत्रे परे अलुग्वा निंदायां। दास्याःपुत्रः
दासीपुत्रः। निंदायां किं। ब्राह्मणीपुत्रः। ऋतो विद्यायोनिसंबंधेभ्यः। विद्यासंबंधयोनिसंबंधवाचिनऋ
दंतात् षष्ठ्या अलुक् स्यात्। होतुरंतेवासी। होतुःपुत्रः। विभाषा स्वसृपत्योः। स्वसृपत्योः परयोर्ऋदंता
त्षष्ठ्या अलुक् स्याद्वा। ननांदृपतिः। ननांदुःपतिः। स्तु विषये। मातरपितृभ्यां स्वसा। आभ्यां परस्य स्वसुः स
कारस्य षः स्यात्समासे। मातृष्वसा। पितृष्वसा। अलुकि तु। मातृपितृभ्यामन्यतरस्यां। षष्ठ्यंतासं

सा.प्र.
१०५
105

परस्य स्वसुः सकारस्य षः स्याद्वा ॥ समासे । मातुस्वसा । मातुःष्वसा । पितुःस्वसा । पितुःष्वसा । असमासे
तु मातुः स्वसेत्येव नित्यं ॥ ॥ इति समासप्रक्रिया ॥ ॥ उपगोरपत्यमिति विग्रहे । प्राग्दीव्यतोऽण् । ते
न दीव्यतीत्यतः प्राक्पदितः परं वक्ष्यते तेऽत्राण्प्रत्ययः स्यादिति ज्ञेयं । तस्यापत्यं । तस्येति षष्ठीसम
र्थादपत्यार्थे यथायथमणादयः स्युः । समर्थानां प्रथमाद्वा । यदितः परं वक्ष्यते प्राग्दिशः इति पावत्सम
र्थानां मध्ये प्रथमं निर्दिष्टाद्वा स्यादिति ज्ञेयं । उ इति षष्ठ्यंतादण् । तद्धितेष्वचामादेः । ञिति णिति च
तद्धिते परे अचामादेरचो वृद्धिः स्यात् । विभक्तिलोपः । ओर्गुणः । अवादेशः । तद्धितान्तत्वात्स्वाद्यु
त्पत्तिः । आदिवृद्धिरस्यापवादवृद्धिं बाधते । औपगवः । वाग्रहणाद्वाक्यमपि । उपगोरपत्यमिति । अन्य
तरस्यामित्यनुवृत्तेः समासोऽपि । उपग्वपत्यमित्यपि समर्थग्रहणादिह । वाक्यमपि । उपगोरपत्यमि

राम
१०५

ति। अप्यतरस्यां। वद्धमुपगोरपत्यं वैत्रस्यां। ग्रामणीत्वाड्गिः। ४। १। ६२। आपगावी। अपत्यं पौत्रप्रभृति गोत्रं। पौत्रप्रभृतेरपत्यं
गोत्रसंज्ञं स्यात्। एको गोत्रे। गोत्रे एक एव प्रत्ययः स्यात्। ननु प्रथमप्रयुक्तं। यद्वा मूलप्रकृतेरेव प्रत्ययोऽस्य
न्निः। उपगोः पौत्रादिरौपगवः। जीवति तु वंश्ये युवा। वंश्ये पित्रादौ जीवति पौत्रादेर्यदपत्यं चतुर्थादि त
द्युवसंज्ञं स्यात्। न गोत्रसंज्ञं। गोत्राद्यून्यस्त्रियां। यून्यपत्ये विवक्षिते गोत्रप्रत्ययान्तादेव प्रत्ययः स्यान्न मू
लप्रकृतेः। स्यान्तरयुवम्। ननु स्त्रियां युवसंज्ञादि। औपगवस्यापत्यं पुमानिति विग्रहे। अत इञ्। अस्त्रा
स्त्रीसमर्थादिञ्स्यादपत्ये। लोपवादः। औपगविर्युवा। अस्त्रियां किं। स्त्रियामि सुहृद्गोत्रप्रत्य
य एव वर्त्तते। औपगवी स्त्री। इदं स्पष्टीतरापत्यं गोत्रापत्यवाचकान्निः। युवापत्यन्तु। यञिञोश्च।
गोत्रे यौ यञिञौ तदन्तात् फक् स्यात्। किंम्। निवाकि। इतिवत्तद्धितपरे अवामादेरवोरष्ठिः

प्र॰ सु॰
१०६
106

स्यात्॥ फक्स्यायनादेशः। दाक्षायणः। दाक्षायणौ। दाक्षायणाः॥ गार्ग्यस्यानंतरापत्यं गार्गिः। गार्गी। गार्ग्य
यः। गोत्रापत्ये तु इञि प्राप्ते। गर्गादिभ्यो यञ्। गर्गादिभ्यो गोत्रापत्ये यञ् स्यात्। गार्गेरपत्यं गार्ग्यः। वात्स्यः
। यञञोश्च। एतयोर्लुक् स्यात्तत्कृते बहुत्वे। नतु स्त्रियाम्। गार्ग्याः। वात्स्याः। न त्वृते किं। प्रियगार्ग्याः। स्त्रि
यां तु गार्ग्यः स्त्रियः। युवापत्ये तु फक्। यञिञोश्च। आपत्यस्य च तद्धितेऽनाति। आपत्ययकारस्य तद्धि
ते परे लोपः स्यात्। न त्वाकारे। गार्ग्यस्य युवापत्यं गार्ग्यायणः। गार्गेर्गार्ग्यस्य गार्ग्यायणस्य वापत्ये वि
वक्षिते। एको गोत्र इति नियमात्। गर्गाद्यादेव यञ्। गार्ग्यः। गार्गस्य गार्गेर्गार्ग्यस्य गार्ग्यायणस्य
वा युवापत्यविवक्षायां गोत्राद्यूनस्त्रियामिति नियमात्। गार्ग्यशब्दादेव युवापत्यप्रत्ययः। गार्ग्या
यणः। भ्रातरि च ज्यायसि। दिज्येष्ठभ्रातरि च जीवति कनीयान् युवसंज्ञः। पित्रादौ मृते जीवति वा
स्यात्

राम
१०६

प्रजो ऽनुजो गार्ग्यायणः। बाह्वादिभ्यश्च। एभ्य इञ् स्यादपत्ये। बाहविः। औपविंदविः। नाम्ना द्वितो औड
लोमिः। आग्निशर्मिः। सुधातुरकङ् च। सुधातुरिञ् स्यादकङ् आदेशश्च। सौधातकिः। व्यासवरुडनिषा
दचंडालबिंबानां चेष्टिः। न य्वाभ्यां पदांताभ्यां पूर्वौ तु ताभ्यामैच्। पदान्ताभ्यां यकारवकाराभ्यां परस्य
अच्वृद्धिः। किं तु ताभ्यां पूर्वौ ऐचावागमौ क्रमात्स्तः। वैयासकिः। वारुडकिः। नैषादकिः। इत्यादि।
गोत्रकुंजादिभ्यश्च्फञ्। एभ्यो गोत्रेऽपत्ये च्फञ् स्यात्। व्रातच्फञोरस्त्रियां। व्रातात् वा च्फञश्च ञंतेभ्य
श्च स्वार्थे ञ्यः स्यात्। न तु स्त्रियां। कौंजायन्यः। ब्राध्नायन्यः। स्त्रियां तु कौंजायनी। अत्र गोत्रत्वेन ञ्या
तित्वात् ङीष्। ञ्यादयस्तद्राजाः। ञ्यादयः प्रत्ययास्तद्राजसंज्ञाः स्युः। तद्राजस्य बहुषु तेनैवास्त्रियां
। तद्राजस्य लुक् स्यात् तत्कृते बहुत्वे न तु स्त्रियां। कौंजायनाः। अनन्तरापत्ये कौंजिः। नडादिभ्यः

ःफक्। एभ्यो गोत्रे फक् स्यात्। नाडायनः। चारायणः॥ आमुख्यायणः॥ अनंतरापत्ये नाडिः। शिवादि
भ्योऽण्। एभ्योऽण् स्यादिञोपवादः। शैवः। ऋष्यंधकवृष्णिकुरुभ्यश्च। एभ्योऽण् स्यात् इञः। ऋषिभ्यः। वा
सिष्ठः। वैश्वामित्रः। अंधकेभ्यः। श्वाफल्कः। रांधसः। वृष्णिभ्यः। वासुदेवः। आनिरुद्धः। कुरुभ्यः। नाकु
लः। साहदेवः। बाह्वादित्वात्। कार्ष्णिः। आर्जुनिः। प्राद्युम्निरित्यादयः इञंताः। बाह्वादेराकृतिगणत्वा
त्। गार्ग्मिः। वैदिः। सौरिः। मातुरुत्संख्यासंभद्रपूर्वायाः। संख्यादिपूर्वाया मातुरपत्येऽण् स्या
दुकारांतादेशश्च। द्वयोर्मात्रोरपत्यं द्वैमातुरः। सांमातुरः। भाद्रमातुरः। कन्यायाः कनीन च। कन्या
या अण् स्यात् कनीनादेशश्च। कानीनः। स्त्रीभ्यो ढक्। स्त्रीप्रत्ययांतेभ्यो ढक् स्यात्। ढस्येयादेशः। वै
नतेयः। मारहेयः। यौवतेयः। शुभ्रादिभ्यश्च। एभ्योऽपत्ये ढक् स्यात्। अविद्यामपठ इति प्राप्तस्य आरोप

वाडवः।शैभ्रेयः।गांगेयः।ढेलोपोऽकद्र्वाः।ढे परे ओर्लोपः स्यात्कद्रूं विना।कामंडलेयः।कद्रूसुकाद्रवे
यः।पंगोश्वन।।पांगवेयः।इतश्चानिञः।इकारान्ताद्व्यचोनंतरापत्ये ढक् स्यात्तन त्विञंतात्।आत्रेयः।
त्रिः।नैतेयः।इतः किं।दाक्षिः।अनिञः किं।दाक्षायणः।द्व्यचः किं।मारीचः।कल्याण्यादीनामिनङ्।एषा
मपत्ये ढक्स्यादिनङादेशश्च।काल्याणिनेयः।त्येष्विनेयः।हृद्भगसिंध्वंते पूर्वपदस्य च।हृदाद्यंत
शब्दे पूर्वोत्तरपदयोर्वृद्धिः स्यात्।सौहार्द्दः।सौभागिनेयः।साक्तुसैंधवः।अनुशतिकादीनां च।उभयप
दवृद्धिः।आनुशातिकं।पारस्त्रैणेयः।कुलटाया वा।अस्या इनङादेशो वा स्यात्।ढकि।कौलटेयः।
कौलटिनेयः।सती भिक्षुकी अत्र कुलटा।चटकाया ऐरक्।चटकापत्ये ऐरक्स्यादपत्ये।चटकादपीष्य
ते।चटकायाः चटकस्य वापत्यं चाटकैरः।स्त्र्यपत्ये लुग्वाच्यः।स्त्र्यपत्यं चटका।गोधाया ढ्रक्।अस्याः

कानेरः २

पत्येढुक्स्यात्॥ ढक्सेयः॥ लोपा व्यार्वलि॥ गोधेरः॥ सु अदित्वात् ढक्॥ गोधेयः॥ आरगुदीचां॥ गौधारः॥
आकारान्ताद्वारणादन्यत्रापि॥ नाटेयः॥ नाटारः॥ क्षुद्रादिभ्यो वा॥ शीलहीना अंगहीनाश्च क्षुद्राः॥ ततो वा
ढक्॥ कोलटेरः॥ दासेरः॥ नाटेरः॥ पक्षे ढक्॥ पितृष्वसुश्छण्॥ अस्माच्छण् स्यादपत्ये॥ छस्य ईयः॥ पैतृष्व
स्रीयः॥ ढकि लोपः॥ पितृष्वसुरन्त्यलोपः स्याड्ढकि॥ अतएव ढक्॥ पैतृष्वसेयः॥ मातृष्वसुश्च॥ मातृष्वस्री
यः॥ मातृष्वसेयः॥ राज्ञश्वशुराद्यत्॥ आभ्यां यत्स्यादपत्ये॥ पौर्वापर्ये श्वशुर्यः॥ यत्वाभावे कर्मणोः॥ यादौ तद्धि
ते अन्न प्रहृत्यान्तर्भावे कर्मणोः॥ राज्ञो जातोऽपत्यं॥ राजन्यः॥ क्षत्रियः॥ राजनोऽन्यः॥ अन्न॥ यो अन्न अ
णि प्रहृत्यात्स्यात्॥ इति टिलोपे न॥ अभावे कर्मणोः किं॥ राज्ञो भावः कर्म वा राज्यं॥ क्षत्राद्घः॥ क्षस्य
यः॥ क्षत्रियः॥ जाता विशः॥ क्षात्रिरन्यः॥ कुलात्खः॥ केवलात्कुलात् खः स्यात्॥ खस्येनः॥ कुलीनः॥ आ

कुत्तां १

दुष्कुलाड्ढक्। दौष्कुलेयः पक्षे ष्कुः कुलीनः
कु॰ गा॰ १ स्वसुश्छः २

व्यकुलीनः। अपूर्वपदादन्यतरस्यां यड्ढकञौ। केवलाद्य ढकञौ वा स्तः। पक्षे खः। कुल्यः। कौलेयकः।
कुलीनः। महाकुलादञ्खञौ। अस्मादेतौ वा स्तः पक्षे खः। माहाकुलः। माहाकुलीनः। ड्ढुष्कुष्छुः। स्वस्री
यः। भ्रातुर्व्यच्च। भ्रातुरपत्यं भ्रातृव्यः। चकाराच्छः। भ्रात्रीयः। व्यन्सपत्ने। भ्रातृव्यः शत्रुः।
स्वरभेदः। रेवत्यादिभ्यष्ठक्। रेवत्यादिभ्योपत्ये ठक् स्यात्। ठस्येकः। ठस्येकादेशः स्यात्। रै
वतिकः। आश्वपालिकः। अनृष्यानन्तर्ये विदादिभ्योञ्। विदादिभ्यो गोत्रापत्ये ञ् स्यात्। ये त्वत्रा
नृषयस्तेभ्य आनन्तर्य्य एवाञ्। वैदः। और्वः। अजन्तत्वाद्बहुत्वे लुक्। विदाः। उर्वाः। गोत्र इत्येव। वैदिः। अनृषि
भ्यः पौत्रः। दौहित्रः। यस्कादिभ्यो गोत्रे। एभ्यो गोत्रप्रत्ययस्य बहुषु लुक्। तत्कृते च बहुत्वे न तु स्त्रियाम्।
यद्वेस्काः। लह्याः। अस्त्रियां किं। यास्क्यः स्त्रियः। अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च। एभ्य

स्तद्धतः। अत्रयः। भृगवः। कुत्साः। वसिष्ठाः। गोतमाः। अंगिरसः। तैनैनेत्यव। प्रियात्रेयाः। स्त्रियांतु
आत्रेय्यः स्त्रियः। जनपदशब्दात्क्षत्रियादञ्। जनपदशब्दात्‌क्षत्रियवाचिनोपत्येऽञ्स्यात्। पां
चालः। वैदेहः। देशशब्दात्किंपोस्ता। क्षत्रियसमानशब्दाज्जनपदस्यास्तन्यापत्यवत्। पंचालानां
राज्ञापंचालः। वैदेहः। आंगः। वांगः। तेतद्राजाः। तेअञादयस्तद्राजसंज्ञाः स्युः। वडत्वेतद्राजस्यति
लुक्। पंचालाः। विदेहाः। अंगाः। वंगाः। कुमुदगंधेरपत्यकौमुदगंधः। वराहस्यापत्यंवाराहिः। ह्रस्व
पत्यस्त्र्यादरं लघुः। ह्रस्वामदर्रलघुसंज्ञंस्यात्। संयोगेगुरु। संयोगेपरेह्रस्वंगुरुसंज्ञंस्यात्। दी।
र्घंवादीर्घंवगुरुसंज्ञंस्यात्। अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ्‌गोत्रे। आदीनामेसमुत्तमंत
स्यसमीपमुपोत्तमंगुरूपोत्तमयोरनार्षयोर्गोत्रे स्त्रियांयावणिञोविहितौतयोः ष्यङादेशः स्या

त्ता षडः। वितौ। यउ अश्वाप्त। कौमुदगंध्या। वाराह्या। अनार्षयोः किं। वासिष्ठी। वैश्वामित्री। अश्वपत्या
दिभ्यश्च। एभ्यः प्राग्दीव्यतीयेष्व पत्यार्थेष्व समस्यान्। एतस्यापवादः। आश्वपतं। गाणपतं। दित्य दित्य
दित्यपत्युत्तरपदा एयः। दित्यादिभ्यः पत्यन्ताच्च प्राग्दीव्यतीयार्थेषु एयः स्यात्। दैत्यः। आदित्यः। ह
लोपमोपयमिलोपइतिपूर्वयकारलोपः। आदित्यं हविः। प्राजापत्यं। सेनापा प्रसेत्यंपमा ष्ष्यते॥
पाद्यं। देवस्य यञ्जो। दैव्यं। दैवं। वहिषष्टिलोपाय एवा बाह्यः। ईकक्। बाहीकः। द्वितेङीषि
कृते स्त्रीभ्यो ढक्। तेन दैतेयः। सिध्यति। उत्सादिभ्योऽञ्। औत्सः। स्त्रीपुंसाभ्यां नञ्स्नञौ भव
नात्। धान्यानां भवने इत्यतः प्राग्वर्तेषु स्त्रीपुंसाभ्यां क्रमान्नञ्स्नञौ स्तः। स्त्रीषु भवः। स्त्रैणः। पौं।
स्नः। एवं समूहादिताग्गतादिषु स्त्रैणं वेत्तिज्ञापकात् त्वर्थेन। स्त्रीवत् पुंवत्। तेन रहं रागात्।

तीयासप्तमीसार्थाद्वा गवाखिना रक्तमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययः स्यात् । इत्यण् । कषायेण रक्त [illegible] ॥
याः पटः । लाक्षारोचनाशकलकर्दमाट्ठक् । अस्माद्रक्तार्थे ठक् स्यात् । अणोपवादः । लाक्षिक इत्यादि । नक्ष
त्रेण युक्तः कालः । तृतीयान्तान्नक्षत्रवाचिनो युक्त इत्यर्थे यथाविहितं प्रत्ययः स्यात् । योयुक्तः स कालश्चेत् । पुष्येण
युक्ता पौषी रात्रिः । लुबविशेषा । कालस्याविशेषश्चेत् प्रत्ययस्य लुप् स्यात् । अद्य पुष्यः । दृष्टं साम । तृतीयान्तात् दृ
ष्टमित्यर्थे यथाविहितं प्रत्ययः स्यात् । यद्दृष्टं साम चेत् । वसिष्ठेन दृष्टं वासिष्ठं साम । परिवृतो रथः । वस्त्रेण
परिवृतो रथो वास्त्रः रथः । पांडुकंबलादिनिः । पांडुकंबली रथः । तत्रोद्धृतममत्रेभ्यः । सप्तम्यन्तेभ्यो
मत्रेभ्य उद्धृतेर्थे यथाविहितं प्रत्ययः स्यात् । शरावे उद्धृत ओदनः शारावः । भुक्तोच्छिष्ट इत्यर्थः । संस्कृतं भ
क्षाः । भ्राष्ट्रेषु संस्कृता भ्राष्ट्राः । सास्मिन्पौर्णमासीति संज्ञायां । पौषी पौर्णमासी अस्मिन्पौषो मासः ॥

सास्यदेवता। देवतावाचिनः प्रथमान्तात् षष्ठ्यर्थे यथाविहितं प्रत्ययः स्यात्। इन्द्रो देवता अस्येत्यैन्द्रं हविः
। पाशुपतं। बार्हस्पत्यं। कस्येत्। कशब्दस्य प्रत्ययः स्यादिकारेन्तादेशः। वृद्ध्यायादेशश्चाको
देवतास्येति कायं हविः। शुक्राद्घ्रः। शुक्रियं। सोमाट्ट्यण्। सोम्यं। टित्वात् सौमी ऋक्। वाय्वृतु
पित्रुषसो यत्। एभ्यो यत्स्यात् ढकेर्षः। ओर्गुणः। वान्तो यि प्रत्यये। वायव्यं। ऋतव्यं। रीङ् ऋतः। अकृ
द्यकारे सार्वधातुके परकारे ईषौ च परे ऋदन्तस्य रीङादेशः स्यात्। पित्र्यं। उषस्यं। अग्नेर्ढक्।
आग्नेयी देवता द्वन्द्वे च। अत्र पूर्वोत्तरपदयोरा द्यचो वा वृद्धिः स्यात् ञ्णिति परे। अग्निमरुतौ देवता
अस्येति आग्निमारुतं शुक्रं हविः। स्वामिन्येतत्। नेह। स्कान्द विशाखः। नेन्द्रस्य परस्य। परस्येन्द्रस्य
वृद्धिर्न सोमेन्द्रपरस्य किं। ऐन्द्राग्नः। दीर्घाच्च वरुणस्य। दीर्घात्परस्य वरुणस्य न वृद्धिः। ऐन्द्राव

प्र.सु.
१११

रुणं। मैत्रावरुणं। दीर्घोत्विं। आग्निवारुणीमनड्वाहीतस्य समूहः। घघण्ञात्समूहार्थे यथा स्वम
णादयः स्युः। काकानां समूहः काकं। भिक्षादिभ्याण्। एभ्योऽण्स्यादुक्तेऽर्थे। ठकाद्यपवादः। भैक्षं। यौ
वतं। तस्य ठेतद्धितर उभिनेहपुंवद्भावः। युवतीनां समूहः यौवतं। गोत्रोक्षोष्ट्रोरभ्रराजन्यराजन
पुत्रवत्समनुष्याजाद्वुञ्। अत्रापत्यप्रत्ययान्तं गोत्रं। अपत्यापवाधकप्रकरणेन। अपत्यार्थप्रत्ययान्ता
दुक्ताद्धिभ्यश्च स्यात्। तावद्धञ्छे इति औपगवकं। दाक्षकं। गार्गकं। आपत्यस्येति यलोपः। औक्षकं। ला
स्यन्तस्यारेर्लोपः स्यात्। वार्द्धकं। केदाराद्यञ्च। उक्तेऽर्थे वुञ्चकाराद्वुञ्। युवोरनाकौ। युवइत्येतयोः
क्रमादन अक इत्येतौ स्तः। कैदारकं। कैदार्यं। अनुनासिकयोरित्। नेहकर्मण्युः। गणिकाया
श्च ञ्य। गाणिक्यं। ठञ् कवचिनश्च। कवचिनः केदाराद्वा ठञ् स्यात्। उक्तेऽर्थे। कावचिकं। कैदारि

राम
१११

कं। धैत्रा। माणववा। उवाय्यता। ब्राह्मणं। माणव्यं। वाडव्यं। ग्रामजनबंधुसहायेभ्यस्तल्। एभ्यस्तल् स्यात्स-
मूहार्थे। तलंतं स्त्री लिंगं। ग्रामता। एभ्याद्विगजाच्च छः। गजता। अचित्तहस्तिधेनोष्ठक्। अचित्तार्थेभ्यो हस्ति-
धेनुभ्यां च ठक् स्यात्। आपूपिकं। हास्तिकं। इसुसुक्तांतात्कः। इस उस उक तकारांतस्य ठस्य कः स्यात्।
त्। धेनुकं। पाशादिभ्यो यः। पाश्या। वात्या। उल्ल्या। पिवान्तलः। खलगोरथात्। यः प्रत्ययः। खल्या। रथ्या गव्या ४
। अनित्रकट्यच्च। खलगोरथेभ्य एते क्रमात्स्युः। खलिनी। गोत्रा। रथकट्या। तदस्यां प्रहरणमि-
ति क्रीडायां णः। प्रहरणार्थात्प्रथमांतात्सप्तम्यर्थे क्रीडायां णः। दाण्डप्रहरणमस्यां क्रीडायां दाण्डा।
। मौष्टा। घञः सास्यां क्रियेति ञः। घञंतात् कृतिकारकपूर्वात्क्रियार्थात्प्रथमांतात्सप्तम्यर्थे ञः।
स्यात्। श्येनतिलस्य पाते ञे। ञप्रत्ययांतपाते परे श्येनतिलयोर्मुमागमः स्यात्। श्येनंपाता।

स्यामिति शेषे नंपानाम्न्याया। तैलंपाता स्वधा। दांराउं याता तिषि:। तदधीते तद्वेद। द्वितीयासमर्थात्त
दधीते तद्वेदेत्यर्थयोर्यथास्वमण्दयः स्युः। वेत्ति णमः। व्याकरणमधीते वेद वा वैयाकरणः। सौवश्वः
इतिहा सपुराणा मांठवाव्यः। ऐतिहासिकः। पौराणिकः। क्रमादिभ्यो वुन्। क्रमकः। पदकः। शिमी
मांसकः। तदस्मिन्नस्तीति देशे तन्नाम्नि। प्रथमासमर्थादस्तु पाधिकात्सप्तम्यर्थे यथा यान्नेनतंनाम्नि
देशे वाच्ये यथास्वं मण्णादयः स्युः। उदुंबराः सन्त्यस्मिन्देशे औदुंबरः। तेन निर्वृत्तं। कुशाम्बेन निर्वृत्ता
कौशाम्बी नगरी। तदस्य निवासः। षष्ठ्यन्तान्निवासे देशे तन्नाम्नि वाच्ये अणादयः स्युः। शिवीनां नि-
वासो देशः शैवः। अदूरभवश्च। षष्ठ्यन्तादद्रभवे देशे तन्नाम्नि वाच्ये अणादयः स्युः। विदिशाया अदू-
रभवं नगरं वैदिशं। जनपदे लुप्। जनपदे वाच्ये चातुरर्थिकप्रत्ययस्य लुप् स्यात्। लुपि युक्तवद्व्या-

निवचने लुपि सति प्रकृतिवल्लिंगवचने स्तः। पंचालानां निवासो जनपदः पञ्चालाः। कुरवः। वरणादि
भ्यश्च। एभ्यश्चातुरर्थिकस्य प्रत्ययस्य अजनपदे पि लुप्स्यात्। वरणानामदूरभवं नगरं वरणाः। नगरं गो
दयोरदूरभवो ग्रामः गोदौ ग्रामः। विशेषणानां चाजातेः। लुबंतस्य विशेषणानामपि लिंगवचने त
द्वत्। जातिं विना। पंचालाः रम्याः। गोदौ रम्यौ। अजातेः किं। पंचाला जनपदो रम्यः। गोदौ ग्रामो रम्यः।
शेषे। अपत्यादिचातुरर्थिकान्तादन्यः शेषः। तत्र यथास्वमणादयः स्युः। मथुरायां जातः माथुरः। श्रा
वण चक्षुः। जातार्थेऽस्माद्द्विस्यादणपवादः। प्रावृषिकः। तत्रभवः। अत्रापि यथास्वमणादयः स्युः।
मथुरायां भवो माथुरः। दिगादिभ्यो यत्। एभ्यो भवार्थे यत्स्यात्। दिश्यं। वर्ग्यं। शरीरावयवाच्च। अस्मा
द्भवार्थे यत्। दन्त्यं। कंठ्यं। अध्यात्मादेष्ठञिष्यते। अध्यात्मभवं। आध्यात्मिकं। अनुशतिकादित्वादु
भयपदवृद्धिः। आधिदैविकं। आधिभौतिकं। ऐहलौकिकं। इत्यादि। तत आगतः। पञ्चम्यन्तादागत

वद्धुषा गृह्यते तच्चाक्षुषं रूपं। श्रावणः शब्दः। तत्र जातः। समयतो जाता... यथास्वमणादयः स्युः। १५

प्र॰सु॰
११३
113

तेर्थे यथापास्त्वमण्णादयः स्युः। मथुराया आगतो माथुरः। ठगायस्थानेभ्यः। स्वामिभागो स्मिन्स्थानार्थे ष्ठ
कु स्यात्। आगतेर्थे। आपणिकः। सोस्य निवासः। प्रथमान्तान्निवासोपाधिकात्षष्ठ्यर्थे यथापास्त्वमण्णादयः स्युः।
स्युः। मथुरा निवासोस्य माथुरः। तेन प्रोक्तं। तृतीयान्तात्प्रोक्ते ऽर्थे यथापास्त्वमण्णादयः स्युः। मनुना प्रो
क्तो मानवो धर्म्मः। कृते ग्रन्थे। तृतीयान्तात्कृतेर्थे अण्णादयः स्युः। ग्रन्थे वाच्ये। वाररुचः ग्रन्थः। त
स्येदं। षष्ठ्यन्तादिदमर्थे यथापास्त्वमण्णादयः स्युः। उपगोरिदं औपगवं। रथाद्यत्। रथस्येदं रथ्यं। ग्रा
माद्यखञौ। ग्रामाद्यखञौ स्तः। शेषेर्थे। अणो ऽपवादः। स्वस्थानादेशः। ग्रामे जातो ग्रामे भवो ग्रामा
द्यागतादिर्ग्राम्यः। ग्रामीणः। नद्यादिभ्यो ढक्। एभ्यो ढक् स्यात्। शेषे। नद्यां जातादिः ना
देयः। माहेयः। दक्षिणापश्चात्पुरसस्त्यक्। एभ्यस्त्यक् स्यात्। शेषे। दक्षिणस्यां जातादिः दा
क्षिणात्यः। पाश्चात्यः। पौरस्त्यः। द्युप्रागपागुदक्प्रतीचो यत्। एभ्यो यत् स्यात्। शेषे। दिवि जातादिः दि

राम
११३

दिव्यः। प्राच्यः। अपाच्यः। उदीच्यः। प्रतीच्यः। अमेयात्यप्र। शेषे। अमेहक्वतसित्रेभ्य एव। अमात्यः। इहत्यः।
क्वत्यः। ततस्त्यः। त्यपनेर्ध्रुवे। नित्यं ध्रुवं नित्यः। ऐषमोह्यः श्वसोऽन्यतरस्यां। एभ्यो वा त्यप् शैषिकः। ऐष
मस्त्यं। ह्यस्त्यं। श्वस्त्यं। पक्षे वक्ष्यमाणष्ठञ्। ऐषमस्तनमित्यादि। च। वृद्धिर्यस्याचामादिस्तद्वृद्धं। यस्याच्समु
दायस्यादिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात्। वृद्धाच्छः। वृद्धाच्छः स्याच्छस्येयं शेषे। आपत्यस्येति यलोपः। गार्गी
यः। सूर्यतिष्येति यलोपः। आगस्तीयः। शालीयः। वा नामधेयस्य वृद्धसंज्ञा। देवदत्तीयः। दैवदत्त
ः। त्यदादीनि च। एतानि वृद्धसंज्ञानि स्युः। तदीयं। विभक्त्यधिकारात्त्वमयोरप्राप्तौ। प्रत्य
योत्तरपदयोश्च। मपर्यन्तयोर्युष्मदस्मदोरेकार्थयोस्त्वमौ स्तः प्रत्ययोत्तरपदे च। त्वदीयम्। मदीय
म्। त्वत्पुत्रः। मत्पुत्रः। भवतष्ठक्छसौ। वृद्धाद्भवतष्ठक्छसौ स्तः। छस्यापवादः। तान्तत्वात्कादेशः। भाव

प्र॰ सु॰
११४
११५

त्कः। सितिश्च। सितिश्रयोपरे याद्यादावज्ञादावपि पूर्वपदसंज्ञं॥ त्तथादेशः। भवदीयः। त्वद्भात्किः। एतत्
ताद्दोर्वाभावतः। उत्तरश्च। गोत्रे यङ्कन्तदन्तादणस्याच्छेषाच्छस्यापवादः। दाक्षाः छात्राः। गार्गादिभ्यो
छः। एभ्यश्छस्यात्। गार्गीयः। जनपरयोः कुक् छः। जनकीयं। परकीयं। युष्मदस्मदोरन्यतरस्यां खञ्च।
एतयोः स्वे खञ् स्याच्छेषे। वा छः। वाग्रहणाद् अण्। तस्मिन्नणि च युष्माकास्माकौ। एतयोः क्रमादेतौ
स्तः। खञि अणि च। युवयोर्युष्माकं वा अयं यौष्माकीणः। यौष्माकः। आस्माकीनः। आस्माकः। त
स्मिन्नणि किं। युष्मदीयं। अस्मदीयं। तवकममकावेकवचने। एकार्थयोर्युष्मदस्मदोः क्रमादेतौ स्तः।
खञि अणि च। तावकीनः। तावकः। मामकीनः। मामकः। छे तु त्वदीयः। मदीयः। मध्यान्मः। शेषे।
मध्यमः। आदेश्च। आदिमः। अवोऽधमो लोपश्च। अधमः। अवमः। अ सांप्रतिके। मध्यशब्दाद्रस्कारप्र

राम
११४

म3

त्ययः स्यात्॥ शैषिकः॥ समे पर्यउत्कर्षापकर्षहीनो मुख्यो वैयाकरणः॥ कालाट्ठञ्॥ कालविशेषवाचिनः
शेषेऽर्थे ठञ् स्यात्॥ अणोऽपवादः॥ ठञ्छृत् एतत्परत्वाद्बाधते॥ मासिकः॥ आर्द्धमासिकः॥ सांवत्सरिकः॥ नि
शाप्रदोषाभ्यां च॥ आभ्यां वा ठञ् स्याच्छेषे॥ नैशं नैशिकं॥ प्रादोषं॥ प्रादोषिकं॥ श्वसस्तुट्॥ श्वसो वा ठञ् स्या
च्छेषे॥ तस्य तुडागमश्च॥ द्वारादीनां च॥ द्वारस्वरमाव्केसमस्वक्षित्यृत्वस्वाधुरउंश्वमस्वर स्वन स्प्य कृतस्व॥
एषां न वृद्धिः॥ ऐजागमश्च॥ सौवस्तिकं॥ पश्चात्स्वस्त्यां सौवस्तनं॥ सर्वत्राण् तलोपश्च॥ हेमंताद् एण् स्यात्त
लोपश्च॥ वेदे भाषायां च॥ हैमनो वायुः॥ ठञ्पीच्छते॥ हैमंतिकः॥ संधिवेलेतिसूत्रेणाण् इहैकते तलो
पात् नै[illegible]॥ सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च॥ एभ्यष्ट्युट्युलौ कालवाचिभ्यष्ट्युट्युलौ स्तः
॥ तयोस्तुडागमश्च॥ सायंतनं॥ सायंतनं॥ स्वरेऽन्नदः॥ चिरंतनं॥ प्राह्णेतनं॥ प्रगेतनं॥ अनव्ययानामेषां

२१६ मं॰त॰

प्र॰सु
११५
115

मांतत्वमेदंतत्वं च निपात्यते॥ अव्ययेभ्यः। दोषातनं। दित्वा। दोषातनी। चिरपरुत्परारिभ्यस्त्नो वक्त
व्यः। चिरत्नं। परुत्नं। परारित्नं। प्रगस्य गलोपश्च। प्रत्नं। अग्रपश्चादिमच्च। अन्ताच्च। अग्रिमं
। अन्तिमं। अव्ययानां भमात्रे टिलोपः। पश्चिमं। सायंप्रातर्भवः सायंप्रातिकः। पौनःपुनिकः। अध्यात्मा
दित्वाट्ठञ्। व[illegible]षष्टिलोप विधानाद नित्योऽव्ययानां टिलोपः। आरातीयः। शाश्वतिकः। तस्य विकारः।
षष्ठ्यंताद्विकारे अणादयः स्युः। सुवर्णस्य विकारः सौवर्णः। अवयवे च प्राण्योषधिवृक्षेभ्यः। विका
रे अवयवे च। कपोतस्य विकारोऽवयवो वा कापोतं। मौर्वं। कांडं। भस्म वा। कारीरं। मयड्वैतयोर्भाषाया
मभक्ष्याच्छादनयोः। विकारावयवयोर्वा मयद्भस्मादीयां। दूर्वामयम्। दौर्वं। भक्ष्याच्छादनयोः। मौद्गः सू
पः। कार्पासं वासः। नित्यं वृद्धशरादिभ्यः। एकाचो गादेश्च नित्यं मयट् स्यात्। एतयोः पं। त्व अस्म।

रा॰म
११५

मयं। दारुमयं। दर्भमयम्। एकाचोपि मयट्। त्वाङ्मयं। विण्मयम्। आमयट्‌ तु नित्य इति केचित्। वि
ल्वमयं। तस्य कृतं वचनेम पर। नदित्रिप्यमासमेधयासाक्षुर्घेणप्रस्तुतमत्रैतत्पर्यमयट् स्यात्॥
अत्रमयायसः। प्राद्यात्मेपीयैके धर्ममयोदेशः॥ गोश्च पुरीषे॥ गोर्मयट् पुरीषेर्थे। गोः पुरीषं गोम
यम्। गोपयसोर्यत्। तयोर्यत्स्याद्विकारावयवयोः मयडादेरपवादः। गव्यं। पयस्यं। फले लुक्।
विकारावयवस्य प्रत्ययस्य फले वाच्ये लुक् स्यात्। लुक्तद्धितलुकि। तद्धितलुकि सति उपसर्ज
नस्य स्त्रीप्रत्ययस्य लुक् स्यात्। बदर्याः फलं बदरं। आमलकं। इको एपाः॥ गोण्याः स्तद्धितलुकि।
सति इकारादेशः स्यात् लुकोपवादः। पंचभिर्गोणीभिः क्रीतः पंचगोणिः। प्लक्षादिभ्योऽण्। ए
भ्यः फलेऽण् स्यात्। विधानसामर्थ्यान्न लुक्। प्लाक्षं। आश्वत्थं। औरस्त्र। जवणीतादत्त्रस्याद्वि

प्र॰सु
११६
116

कारादेस्तस्य फले लुक्। जंब्वाः फलं जंबु। ह्रस्वो नपुंसके। जंबावा जंब्वाः फले वाच्ये। ।ग स्याद्वावि
धानात्र लुक्। जांववं। लुप्च। जंब्वाः फलप्रत्ययस्यवालुप्स्यात्र लुक्। जंबूः स्त्रीपि देप्राग्वत्राफ
लपाकशुषां लुविषः। व्रीहयः। माषाः। पुष्पमूलेषु बहुलं। मल्लिकायाः पुष्पं मल्लिका। जातिः
। वदर्या मूलं बदरी। वृहती। रिंगणी। क्वचिन्न। पाटलायाः पुष्पं पाटलं। पुष्पं [illegible]। रीत
क्यादिभ्यश्च। एभ्यः फलप्रत्ययस्य लुप्। न लुक्। हरीतक्याः फलं हरितकी। द्राक्षा। हरीतक्या
दे: प्रकृतिलिंगमेवेष्यते न तु प्रकृतिवचनं। हरीतक्याः फलानि हरीतकाः। तत्र नियुक्तः
। सर्वमंतादग्नियुक्तोपे ठक् स्यात्। द्वारादित्वादैच्। द्वारे नियुक्तो द्वावारिकः। स्वरस्यापि सौ
वरः। वैयल्कसः। तदाहेति माशब्दादिभ्यष्ठक् वाच्यः। स्वस्तीत्याह सौवस्तिकः। माशब्दिकः। स्व

इ।१

राम
११६

र्वः सौवः । स्वादुमृदुनइदं सौवादुमृदवं । पुनरइदं शौवनं । अनुइति प्रकृत्या स्फैयकृतं । स्वस्येदं
सौवं । नस्यादिविधिरत्र । सौवग्रामिकः । सौवाध्यायिकः । स्वाध्यायं पठति सौवाध्यायिकः । न्य
ग्रोधस्य च केवलस्य । असेगागमः स्यात्तत्र तु वृद्धिः । नैयग्रोधं फलं । केवलस्य किं । न्यग्रोधमू
ले तवाः न्यग्रोधमूलाः । शालयः । स्वागतादीनां च । एषामैच न स्यात्तत्र आदिवृद्धिः । स्वागतमि
त्याह स्वागतिकः । स्वाध्वरिकः । स्वांगिः । व्यांगिः । व्याडिः । कश्यावहारिकः । स्वापतेयं । श्वादेरि
ञि श्वादेरैच् इञि परे । श्वभस्त्रस्यापत्यं श्वाभस्त्रिः । इकारादाविति वाच्यं । श्वगणाट्ठञ्च । अस्मा
न्नेन चरति पर्पादिष्ठन् स्यात् । ठन् च । श्वागणिकः । श्वगणिकः । पदान्तस्यान्यतरस्यां । एदशब्दा
न्तस्याच्श्वादेरैच् स्याद्वा । श्वापदस्येदं श्वापदं । शौवापदं । न्यंकोर्वेति केचित् । न्यांकवं नैयंकवं ।

प्र.सु.
११७
117

।सुसर्वार्द्धाज्जनपदस्य। एभ्योजनपदवाचिनउत्तरपदस्यैववृद्धिःस्यात्।सुपांचालः।सर्वपां
चालः।अर्द्धपांचालः।संयोगादिश्च। संयोगात्परइन्नप्रकृत्यास्यात्।अणिपरे।चाक्रिणः।अ
न्।अणिअन्प्रकृत्यास्यात्।याज्वनः।सामनः।नमपूर्वापत्येवर्म्मणः।मात्परोन्प्रकृत्यान
स्यात्।अपत्येऽणिनतुवर्म्मणः।सुसाम्नोपत्यंसौसामः।भाद्रशर्म्मः।अपत्येकिं।साम्नोयंसाम
नः।अवर्म्मणःकिं।भाद्रवर्म्मणः।अश्मनोविकारेटिलोपः।अश्मनोविकारःआश्मं।अश्मनोय
माश्मनोराशिः।हेम्नोविकारःहैमः।ब्राह्मोजातौ।अजातौअयंनिपात्यते।ब्राह्मोमहः।जाता
वपत्येतुब्राह्मणः।पत्यंब्राह्मणः।कार्म्मस्ताच्छील्ये।कर्म्मशीलःकार्म्मः।कर्म्मणःस्यात्।औक्ष
मनपत्ये।अणिस्त्रियामपत्ये।औक्ष्णी।अपत्येतुषपूर्वहनधृतराज्ञामणिएषामवाल्लिनच्छिन्न।।

राम
११७

आद्वि कौ ३

कौ १

ऽनोल्लोपः स्यात् ॥ उत्सोरपत्यं औत्सः ॥ वार्त्तिकः ॥ धार्त्तराष्ट्रः ॥ एषामेवार्थ्यं ॥ सामर्थ्यात् ग्रामव हते पष्ठ्या तद्धहती
त्यातः प्राग्दीव्यतः ठक् अधिक्रियते ॥ तेन दीव्यति खनति जयति जितं ॥ तृतीयान्ताद्दीव्यतीत्याद्यर्थेषु ठक्
स्यात् ॥ अक्षैर्दीव्यति आक्षिकः ॥ कुदालेन खनति कौदालिकः ॥ स्त्रीत्वे कौदालिकी ॥ अक्षैर्जयति
आक्षिकः ॥ स्त्रीवेदा स्त्रीकी ॥ भावह्यत्यपं नान्त्रिवर्त्ते ऽमन्त्रवाद्याः ॥ पाकेन निर्वृत्तः पाकिमः ॥ त्यागि
मः ॥ पश्चिमस्त्वमव्यान्हन्ति ॥ एभ्यो द्वितीयान्तेभ्यो हन्त्यर्थे ठक् स्यात् ॥ स्वरूपस्य पर्यायाणां विशेषाणां
च ग्रहणं पक्षिणो हन्ति पाक्षिकः ॥ शाकुनिकः ॥ तैत्तिरिकः ॥ मार्गिकः ॥ हारिणिकः ॥ सौरंगि
कः ॥ मात्स्यिकः ॥ अत्र पर्यायानग्रहं तो अनिमिषान्हन्ति ॥ मीनस्य षिः ॥ मैनिकः ॥ विशेषाणां ग्र
हणमपीष्यते ॥ शाकुलिकः ॥ संस्कृतं ॥ तृतीयान्तात् संस्कृतेर्थे ठक् स्यात् ॥ दध्ना संस्कृतः दाधिकः ॥

प्र॰सु॰
११८
118

शब्ददर्दुरं करोति ।। आभ्यां द्वितीयांताभ्यां करोत्यर्थे ठक् स्यात् शाब्दिकः । दार्दुरिकः । धर्म्मं चरति । अ-
स्माच्चरत्यर्थे ठक् स्यात् ।। धर्म्मं चरति धार्म्मिकः । अधर्म्मात् । आधर्म्मिकः ।। अस्ति नास्ति दिष्टं मतिः । एभ्यो
मत्सुपाधिकेभ्यः प्रथमान्तेभ्यः षष्ठ्यर्थे ठक् । परलोकमतिरित्येष्यते । आस्तिकः । नास्तिकः । प्रमाणा-
नुगामतिर्दिष्टा । सास्यास्तीति दैष्टिकः । प्राग्घिताद्यत् ।। तस्मै हितमित्यतः प्राग्यदधिक्रियते ।। तद्व-
हति रथयुगप्रासंगं ।। एभ्यो द्वितीयांतेभ्यो वहत्यर्थे यत् । रथ्यः । युग्यः । प्रासंग्यः । धुरो यड्ढकौ । धौरेय-
:। हलि चेति रेफवांतस्य धातोरुपधाया इको दीर्घः स्याद्धलि परे र्‌ ति दीर्घत्वे प्राप्ते । न भकुर्छुरा
। भस्य कुर्छुरोरुपधाया न दीर्घः । धुर्य्यः । खः सर्वधुरात् । अस्मात् खः स्याद्वहत्यर्थे । सर्वधुरीणः
एकधुराल्लुक् च । अस्माल्लुक् स्यात् खश्च । एकधुरीणः । एकधुरः । शाकटाण् । शाकटः । हलसी
तोतस्यवेवा ।

राम
११८

सोदराद्यः। यप्रत्यये विवक्षिते प्रागेव समादेशः सोदर्य्यः। आग्नाद्यत्। अस्माद्धितार्थे यत्स्यात् काघे
अग्रेभवः अग्र्यः ४

ता ४ तद्धिता भा १

राहलाद्धालिकः। सैरिकः। तत्र साधुः। सभायाद्यः। तत्साधुर्थे यत्स्यात् सोऽपि प्रकृत्या। सामसु साधुः। साम
न्यः। कर्मण्यः। सभायाय। अस्माद्यः स्यात् साध्वर्थे। सभ्यः। समानतीर्थे वासी॥ अस्मात् सप्तम्यन्ताद्व
सी सपद्यत् स्यात्। समाने तीर्थे गुरौ वासी सतीर्थ्यः। समानोदरे शयित आवोदात्तः। सप्तम्यन्ताच्छयित
र्थे यत्। आका स्वोदात्तः। समानोदर्ये भ्रातर्य्यः। छन्दोवा। अग्नियः। अग्नीयः। तस्मै हितं। चतुर्थ्यन्ताद्धित
र्थे छः स्यात्। छं वायत् स्यात्। अग्रेभवः अग्र्यः। छन्दो वा अग्रियः। अग्रीयः। तस्मै हितं। चतुर्थ्यन्ताद्धि
तार्थे छः स्यात्। सख्युरपि हितः सखीयः। सर्वप्रतितिच्छेति पक्षेणः। पारीरावयवाद्यत्। अस्माद्धितार्थे यत्स्या
तादर्थ्यं। आत्मनीनं। विश्वजनीनं। मातृभोगीणः। तेन क्रीतं। तृतीयान्तात् क्रीतेर्थे ठञ् स्यात्
। सप्तत्या क्रीतः साप्ततिकः। संख्यायाः अतिशदन्तायाः कन्। संख्यायाः कन् स्यात् क्रीतार्थे नुतुत्यं(

२ आत्मन् विश्वजन भोगोत्तरपदात्खः। एभ्यः खः स्याद्धितार्थे। आत्माध्वानौ खे। एतौ खे प्रकृत्या स्तः

नशदंतायाः। पञ्चकः पटः। त्रिंशद्गणायास्तु आशीतिकः। चात्वारिंशत्कः। बहुगणवतुडति संख्या।
वतोरिड्वा। वतोः परस्य कनो वा इडागमः स्यात्। तावतिकः। तावत्कः। विंशतित्रिंशद्भ्यां ड्वुन् असंज्ञायां॥
आभ्यां ड्वुन् स्यान्नाम्नि। विंशकः। त्रिंशकः। शताच्च ठन्यतावशते। अनेन क्रीतः शत्यः। शतिकः। अश
तिकः। अशते किं। शतं परिमाणमस्य शतकः। तस्येश्वरः। सर्वभूमिपृथिवीभ्यां षष्ठ्यंताभ्यामीश्व
रेर्थे अणञौ स्तः। सर्वभूमेरीश्वरः सार्वभौमः। पार्थिवः। तेन तुल्यं क्रिया चेद्वतिः। तृतीयांतात्तुल्येर्थे व
तिः स्यात्। यत्तुल्यं सा क्रिया चेत्। ब्राह्मणेन तुल्यं वर्त्तते ब्राह्मणवत्। क्रिया यां किं। गुणतुल्ये माभूत्।
पुत्रेण तुल्यः स्थूलः। तत्र तस्येव। सप्तम्यंतात् षष्ठ्यंताच्च इवार्थे वतिः स्यात्॥ मथुरायामिव मथुरावत्।
स्रुघ्ने प्राकारः। मैत्रस्येव मैत्रवत्। चैत्रस्य गावः। तस्य भावस्त्वतलौ। षष्ठ्यंतात् भावेर्थे त्वतलौ स्तः।

स्प १

शब्दप्रवृत्तिनिमित्तं भावः। त्वान्तं क्लीबं। तलन्तं स्त्रियां। साधोर्भावः साधुत्वं साधुता। ह्रस्वात्तादौ
तद्धिते। ह्रस्वात्परस्य सस्य षः स्यात् तादौ तद्धिते परे। यजुष्टं यजुष्टा। ह्रस्वात् किं। गीस्त्वं। तिङो माप्र
ङः। निषेधः। भिंद्युस्तरां। आ त्वात्। ब्रह्मणस्त्व इत्यतः प्राक् त्वतलौ। वकारात् ... समावे
शः। स्त्रैणं स्त्रीत्वं। स्त्रीता। पौंस्नं पौंस्त्वं। पुंस्ता। पृथ्वादिभ्य इमनिज्वा। पृथ्वादिभ्य इमनिज्वा स्यात्। टेः। टेरो
टेः भस्य टेर्लोपः स्यादिष्ठेमेयस्सु परतः। र ऋतो हलादेर्लघोः। हलादेर्लघोः ऋकारस्य रः स्यात् इ — र.२
ष्ठेमेयस्सु। एषां भाव इमनामेव। प्रथिमा। म्रदिमा। हलादेः किं। ऋजिमा। लघोः किं। कृष्णिमा। ए
पृथुमृदुभृशकृशदृढपरिवृढानामेव रत्वं। पृथुत्वं। पृथुता। वर्णदृढादिभ्यः ष्यञ्च। वर्णविशे
षवाचिभ्यो दृढादिभ्यश्च ष्यञ् स्यात्। इमनिज्वा। शौक्ल्यं। शुक्लिमा। दार्ढ्यं। द्रढिमा। लाघवं। — नं
नव १ घिमा। चिन्त्वाद्ङः। ... वितौ। ... विती। पसत्व ... गुणवचनब्राह्मणादिभ्यः कर्मणि च

प्र.मु.
१२०
120

गुणवचनब्राह्मणादिभ्यः ष्यञ् स्यात्कर्म्मणि भावे वा । जडस्य कर्म्म भावो वा जाड्यं । ब्राह्मण्यं । चौर्य्यं
। पक्षे भावकर्म्मणि त्वतलौ । चतुर्वर्णादीनां स्वार्थे ष्यञ् वाच्यः । चत्वार एव वर्णाश्चातुर्वर्ण्यं । त्रै-
लोक्यं । चातुराश्रम्यं । चातुर्वेद्ये उभयपदवृद्धिः । चातुर्वैद्यं । स्तेनाद्यन्नलोपश्च । अस्माद्यत्स्या-
न्नस्य च लोपः भावकर्म्मणोः । स्तेयं । योगविभागात्स्तेनात्ष्यञ् । स्तैन्यं । सख्युर्यः । सख्यं । दूतवणि-
ग्भ्यां च । दूत्यं वाणिज्यं । कपिज्ञात्योर्ढक् । कापेयं । ज्ञातेयं । पत्यन्तपुरोहितादिभ्यो यक् । सैनाप-
त्यं । राज्यं । पौरोहित्यं । प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् । एभ्योऽञ् स्यादुक्तेऽर्थे । आश्वं । कौ-
मारं । औद्गात्रं । हैहायनं । हायनान्तयुवादिभ्योऽण् । एभ्योऽण् । द्वैहायनं । यौवनं । सौहार्दं । इगन्ताच्च लघुपूर्वा-
त् । लघुपूर्वादिगन्तादण् स्यादुक्तेऽर्थे । मौनं । गौरवं । लघुपूर्वात्किं । कड्यं । योपधाद्गुरूपो-
त्तमाद्वुञ् । रामणीयकं । सहायाद्वा । साहायकं । साहाय्यं । धान्यानां भवने क्षेत्रे खञ् । धान्यवि-

राम
१२०

ग्रोषेर्षेभ्यः षष्ठ्यन्तेभ्यश्च वनेनेत्रं पूर्वस्यात्। भवनमत्रे तिसकनं मुद्गानां भवनं सेत्रं मोऽङ्गीनो। ब्री
हिशाल्येर्ष्ठक्षुद्रेहेये। शालेये। यवयवकषष्ठिकाद्यत्। यव्यमित्यादि। विभाषा तिलमाषोमा।
भङ्गाणुभ्यः। तिलादिभ्यो वा यदुक्ते पूर्वपत्रेत्वञ्जे। तिल्ये। तैलीनमित्यादि। नसद्वीदेः पथ्यंग कर्म
पत्रपात्रे व्याप्नोति। सर्वपूर्वकात् पथ्याद्यङ्गादीनां यात्राह्याप्नोति सर्पथखः स्यात्। सर्वपथाख्या
प्नोतीति सर्वपथीनः। पूर्वपदस्थान्निमित्तादुत्तरपदे तद्धितस्य च नकारस्य णत्वमिष्यते
। सर्वाङ्गीणः। इत्यादि। अध्वनो यत्खौ। अस्माद्वितीयान्तादलंगामीत्यर्थे यत्खौ स्तः। अध्वा
नमलं गच्छति अध्वन्यः। अध्वनीनः। तुल्यपाकमूलेपील्वादिकर्णादिभ्यः कुणब्जाहचौ। षष्ठ्यन्ते
भ्यो पील्वादेः कर्णादेश्च क्रमात्पाक मूलयोरर्थयोः कुणब्जाहचौ क्रमात्स्तः। लीलूनां पाकः पीलु

पु०प
१२०
हिप
१२१

कुणः। कर्कंकिकुणः कर्णस्य मूलं कर्णजाहं। अस्तिजाहं। नेन त्रिन्नश्चेखुस्ख णपो। त्तती पांतान्न
छिन्नेर्थे एतोमत्तः। खुट्ट अस्या नित्यत्वान्नव स्वेतसंस्ता। विद्यया त्रालो विद्याखंखु विद्यावणः। संप्रो
दश्वकटखा संकरं। १ कटम। ३ तकरम। वाह्निकटम। अलाबतिलामा संगाभार्ज सिकटखू
वाद्यः। अलाबलोरजः अलाबुकरं। गोष्ठजाः व्यः स्थानादिषु पशूनामस्यः। गावांस्थानं गोगो
छंरथेजसिकटमेवा गोष्ठेसंघातेकटचा। अंवीनांसंघातः अविकटः। विस्तारे पटखू। अविप
टः। द्वित्वे गोयुगम्वा। उष्ट्रगोयुगं। षट्त्वे षड्गवं। अश्वानां षड्गु। अश्वषड्गवं। स्नेहेतैलखू। तिल
तैलं। नववने सेत्रेशाकटशा किंनो। इक्षुशाकिनं। इक्षुशाकटं। तस्मोदे संजातं तारेका दिभ्यइ
नच। पण्यः प्रपणमांनेभ्यः संजातो पाधि के स्थष्टभ्यर्थे उत्त वस्यातत। तारकासंजाता अस्यतत्ता

राम
१२१

रक्तिं तं नमः। पुष्पितोऽरत्नः। गर्भादिप्राणिमोवेष्यते। मार्गितः। प्रमाणे द्वयसज्दघ्नञ्मात्रचः॥
प्रमाणे पाणिकाद्युपमेताना मर्थे एते प्रत्ययाः स्युः। ऊरुद्वयसं। जानुदघ्नं। नाभिमात्रं। प्रमाणे लः। प्रमा
णशब्दस्य प्रत्ययस्य लुक्। वितस्तिः प्रमाणमस्य वितस्तिः। द्विगोर्नित्यं। द्विवितस्तिः। शाठ।
कीपुरुषहस्तिभ्यामण् वा। आभ्यामुक्तेऽर्थे अण् स्यात्। द्वयसज्जादघ्नञ्च। पौरुषं। उनायनपरप्र
नपमार्थे। पणिषरदन्त्रक्षत्रस्यात्। हास्तिनं। अपमेतु मेधाविनो। पत्तं मैधावो पदे पुरुषद
यसमित्यादि। यत्तदेतेभ्यः परिमाणे वतुप्। एभ्यः परिमाणे पाणिके अस्मिः षष्ठ्यर्थे वतु स्यात्। आ
सर्वनाम्न इत्यात्वं। यत्परिमाणमस्य यावान्। किमिदंभ्यां वो घः। आभ्यामुक्तेर्थे वतु स्यात्। इदं
कोरीशकी। वस्य इणादेशः। यस्मोतिवेतीकारलोपः। किं परिमाणमस्य कियान्। इयान्।

।किमः संख्यापरिमाणे डति च। संख्यापरिच्छेदे वर्त्तमानात्किमः षष्ठ्यर्थे डतिः स्यात्। वतुप
।तस्य वश्च घः। टेर्लोपः। का संख्या येषां ते कति विप्राः। क्षेपनी किं संख्या येषां दशानां। पञ्चत्वामपि
डतिरिति केचित्। पचि। तति। संख्याया अवयवे तयप्। अवयववृत्तेः संख्यायाः षष्ठ्यर्थे अवयवि
नि तयप्। पञ्च अवयवा अस्य पञ्चतयं। चतुष्टयी रज्जुः। द्वित्रिभ्यां तयस्यायज्वा। उभांशात्तयपोऽयप्
ज्वदेशः स्यात्। द्वयं। त्रयं। द्वितयं। त्रितयं। उभादुदात्तो नित्यं। उभा। स्वरमात्तयपो नित्यमयजा
देशः स्यात्। सर्वो देशः उभौ अवयवौ अस्य उभयं नयः। तदस्मिन्नधिकमिति दशान्ताड्डः। प्रथमान्तादधि।
कोपाधिकाद्दशान्तात्सप्तम्यर्थे डः स्यात्। एकादश अधिका अस्मिन्शते सहस्रे वा एकादशं श
तं द्वादशं वा। शतसहस्रयोरेवेष्यते। नेह द्वादशाधिका संख्या त्रिंशतीति। प्रकृतिप्रत्यार्थयोर्येताये

नाष्काशमाषा अधिका अस्मिन् त्रिंशकं शतं। दशान्ताड्डः। पञ्चाधिका अस्मिन् शते अन्नग्रहणं डिः। द

शाधिका अस्मिन् शतं। शदन्तविंशतेश्च। शदन्ताद्विंशतेश्च डः स्याड्डट्‌ऽर्थे। त्रिंशं शतं विंशं शतं। संख्या

पूर्वादं पदान्ते। एकविंशं शतं। एकत्रिंशं तं शतं। एकत्रिंशं। तस्य पूरणे डट्। षष्ठान्तात् संख्या

वाचिनः पूरणेऽर्थे डट् स्यात्। पूर्यते संपद्यते संख्यानेनेति पूरणः। एकादशानां पूरणः एकाद

शः। द्वादशी। नान्तादसंख्यादेर्मट्। नान्तात् संख्याया असंख्यादेर्मडागमः स्यात् न तु संख्यापूर्वा

त्। पञ्चमः। नान्तात्किं। विंशः। संख्यादेस्तु द्वादशः। षट्कतिकतिपयचतुरां थुक्। एषां डति थुक्

गागमः स्यात्। षष्ठः कतिथः कतिपयथः। चतुर्थः। चतुरश्छयतौ चलोपश्च। तुरीयः। तुर्यः।

बहुपूगगणसंघस्य तिथुक्। एषां तिथुगागमः स्याड्डटि। बहुतिथः। इत्यादि। पूगसंघास्य

मत एव डट्॥ वतो रिथुक्॥ वतो रिथुगागमः स्यात्॥ डरि॥ पाव निपः॥ द्वेस्तीयः॥ द्वेः पूरणे तीयः स्यात्॥
द्वितीयः॥ त्रेः संप्रसारणं च॥ त्रेः पूरणे तीयः स्यात् संप्रसारणं च॥ तृतीयः॥ विंशत्यादिभ्यस्तमडन्यतरस्या
म्॥ एभ्यः परस्य डटो वा तमडागमः स्यात्॥ विंशतितमः॥ द्वात्रिंशत्तमः॥ विंशः॥ त्रिंशः॥ नित्यं शतादि
मासार्द्धमाससंवत्सराच्च॥ एभ्यो डटो नित्यं तमडागमः स्यात्॥ शततमः॥ सहस्रतमः॥ मासतमः॥ अ
र्द्धमासतमः॥ संवत्सरतमः॥ मासादेरत एव डट्॥ षष्ट्यादेश्चासंख्यादेः॥ षष्ट्यादेर्डटो नित्यं तमट्
स्यात्॥ नत्वसंख्यापूर्वात्॥ विकल्पापवादः॥ षष्टितमः॥ सप्ततितमः॥ संख्यादेस्तु वा॥ एकषष्टः॥ ए
कषष्टितमः॥ मतौ छः सूक्तसाम्नोः॥ मत्वर्थे छः स्यात् सूक्ते साम्नि च॥ अच्छावाकशब्दोऽस्मि
न्नस्ति अच्छावाकीयं॥ सूक्तं॥ वारवन्तीयं साम॥ अनुकरणत्वाद्भिन्नपदादपि॥ अस्यवामीयं किया

श्रीमीयं। पूर्वादिनिः। अस्मादिनिः स्याद्धेनेनत्यर्थे। पूर्वमनेननमु त्कंपीतंवापूर्वी। सपूर्वाच्च॥
सोपपदात्पूर्वादिनिःस्यात्। पूर्वंकृतमनेनेतिकृतपूर्वीकटं। सुप्सुपेतिसमासेसतिनद्धितः
। इष्टादिभ्यश्च। इष्टमनेनइष्टीपते। अधीतीव्याकरणे। तदस्यास्त्यस्मिन्निति मतुप्। प्रथमा
न्तादस्तूपाधिका दस्या स्त्यस्मिन्नित्यर्थे मतुस्यात्। श्रीरस्यास्त्यस्मिन्वा। श्रीमान्। श्रीमती। त
सोमत्वर्थे। तां तसो तो तमसञ्ज्ञो सोम त्वर्थे प्रत्यये परे। वसोः संप्रसारणं। ५ अपदान्तत्वान्नदत्वं।
विदुष्मान्। दोष्मान्। गुणवचनेभ्यो मतुपो लुगिष्टः। शुक्लोगुणोस्यास्मिन् शुक्लः पटः। मा
दुपधायाश्च मतोर्वोऽयवादिभ्यः। मवर्णावर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जितात्परस्य
मतो र्मस्य वः स्यात्। ज्ञानवान्। किंवान्। विद्यावान्। लक्ष्मीवान्। यशस्वान्। भास्वान्। य

वांदेश्च पवमाने । व्र मिमाने । झयः । झयन्तान्मतोर्मस्य वः स्यात् । विद्युत्वान् । अपदान्तत्वा
न्न जश्त्वं । प्राणिस्थादातो लजन्यतरस्यां । आकारांतात्लच्वास्यान्मत्वर्थे । चूडालः । चूडावान् । प्रा
णिस्थात्किं । शिखावान् । दीपः । प्राण्यंगादेव । नेह । मेधावान् । सिध्मादिभ्यश्च । एभ्यो लज्वा । सि
ध्मलः । पक्षे सिध्मवान् । फेनादिलच्च । फेनिलः । अन्यतरस्यामित्यनुवर्त्तते । फेनवान् । खकारा
त्फेनलः । लोमादिपामादिपिच्छादिभ्यः शनेलचः । त्रिभ्यो गणेभ्यः क्रमाच्छनइलच एते वा
स्युः । लोमशः । रोमशः । पामनः । अंगना । पिच्छिलः । उरसिलः । पक्षे मतुप् । प्रज्ञाश्रद्धार्चावृत्ति
भ्यो णः । एभ्यो णः स्यान्मतुप् च । प्राज्ञः । श्राद्धः । प्रज्ञावान् । इत्यादि । दन्त उन्नत उरच् । उन्नता दन्ता
अस्य दन्तुरः । ऊषसुषिमुष्कमधो रः । एभ्यो मत्वर्थे रः स्यात् । ऊषरः । सुषिरः । मधुरः । इत्या

दि। खर्जुस्वर्कुंजेरम्मख्या। खरः। सुखरः। कुंजरः। कुंजोऽह सिहन्तुः। नगपांडुपुरमख्यवाख्याः। नगरम्। पां

डुरः। पांसुरः। कच्छाइस्वत्वश्च। कच्छुरः। केशाद्वोऽन्यतरस्यां। केशवः। अन्येभ्योऽपि मणिवः। अर्णसो

तलोपश्च। अर्णवः। प्रदेमतुपमेधारथाभ्यामिरन्निरचौ। मेधिरः। रथिरः। कांडांडादीरन्नीरचौ

छ्या। न्यायमैतोसः। कांडीरः। आंडीरः। द्युद्रुभ्यां मः। द्युमः। द्रुमः। अतइनिठनौ। अकारांतादिनि

ठनौ स्तो मत्वर्थे। मतुषा। दंडी। दंडिकः। पदे दंडवान्। व्रीह्यादिभ्यश्च। एभ्य इनिठनौ स्तः। व्रीही

। शिखी। व्रीहिकः। शिखादेर्नठन्। एकाक्षरात्कृतो जातेः सप्तम्यां च न तौ स्मृतौ। स्ववान्। कारकवा

न्। सिंहवान्। दंडा अस्यां संतीति दंडवती। शाली। क्वचिदपवादो। पि। कार्पी। कार्पिकः। तुंदादिभ्य

इलच्च। तुंदिलः। पदे तुंदवान्। अस्मायामेधास्रजो विनिः। अस्मान्मायादेश्च विनिः स्या(

प्र॰ सु॰ १२५ 125

न्मनुष्ठा। तेजस्वी। मायावी। मेधावी। स्त्रोः कुः॥ स्रग्वी। पयसोस्त्रग्वा। मित्यादि। व्रीह्यादित्वान्मायी मा
यिकः॥ शृंगवृंदाभ्यामारकन्। शृंगारकः। वृंदारकः। फलबर्हाभ्यामिनच्। बर्हिणः। फलिनः
। रपाद्वा रपिनः॥ शीतोष्णतृप्राभ्यामालुच तदसहने। शीतं न सहते शीतालुः। बलाद्दूलः। व
लूलः। वाताद्दवाद्वाः। वातूलः॥ तप्पर्वमरुद्भ्याम्। पर्वतः। मरुत्तः॥ ऊर्णाया युस्। पदत्वान्ना
वर्णलोपः। ऊर्णायुः। वाचो ग्मिनिः। वाग्मी। आलजाटचौ बहुभाषिणि। बहुगर्ह्या वाग्यस्या
स्ति वाचालः। वाचाटः॥ स्वामिन्नैश्वर्ये। स्वामी। स्ववान्॥ अर्शः। अर्शआदिभ्योऽच्। अर्शसः॥ वैजयंतः। राम
तातातीसाराभ्यां कुक्। आमयाभिस्या कुग्वागमः। वातकी। अतीसारकी॥ पिशाचाच्चेति वक्त १२५
व्यम्। पिशाचकी। हस्ताज्जातौ। हस्ती। हस्तवानन्यः॥ कंशंभ्यां बभयुस्तितुतयसः। आम्यामेते

श्रीगणेशाय नमः।
श्रीसिद्धेश्वर्यै नमः।

सप्त प्रत्ययाः स्युः। मत्वर्थे। कंवः। कंनः। कंपुः। कंतिः। कंतुः। कंतः। कंयः। एवं प्रावादि। नुं दिव लि
वटेभ्यः। एभ्यो नः स्यान्मत्वर्थे। नुंदिनः। इत्यादि। अहंशुभमोर्युस्। आभ्यां मत्वर्थे युस् स्यात्। पद
त्वान्नरि लोपः। अहंयुः। शुभंयुः। रजः कृष्यासुति परिषदो वलच्। एभ्यो मत्वर्थे वलच् स्यात्। र
जस्वला। वले। वले परे पूर्वस्याणो दीर्घः स्यात्। कृषीवलः। आसुतीवलः। परिषद्वलः। क्वचि
दन्येभ्योपि दृश्यते। भ्रातृवलः। पुत्रावलः। इत्यादि। दन्तशिखात्संज्ञायां। आभ्यां वलच् स्या
त्संज्ञायां। दन्तावलः। शिखावलः। प्रागिदशो विभक्तिः। दिक्शब्दमभिव्याप्य इतः प्रागित
ऊर्द्ध्वं विभक्तिसंज्ञाः प्रत्ययाः। विभक्तित्वात्पदत्वादि। किंसर्वनामबहुभ्योऽद्व्यादिभ्यः।
वक्ष्यमाणाः प्रागिदशीयाः प्रत्यया एते एव स्युः। नतु द्व्यादिभ्यः। पञ्चम्यास्तसिल्। पञ्च्या

म्यंतात् किंसर्वनाम्नस्तसिल् स्यात् स्वार्थे। लः स्वरार्थः। सुपो लुक्। कुतिहोः। तकार इकारादौ प्रत्यये परे किं
मः कुः स्यात्। तान्निद्धितत्वात् स्वाद्युत्पत्तिः। अव्ययत्वात् सुपो लुक्। कुतः। कस्मात्। सर्वतः। विभक्तित्वा
त् त्यदाद्यत्वं। ततः। यतः। इकुतः। ध्यादेसह द्वाभ्यां। किमादकिं। बहुलात्। सर्वप्रातिपदिकात्तसि
लित्येके। इतस्ततः। इदमइश्। प्राग्दिशीये परे इदम इश् स्यात्। इतः। एतदोश्। एतदो अस्यात्प्रा
ग्दिशीये। अतः। विभक्तिकार्यं। अमुतः। उ प्रयच्छ। प्राग्दिशीये परे उ सु स्याद्देशः स्यात्। उ
भयतः। पर्यभिभ्यां च। आभ्यां तसिल् स्यात्। परितः। अभितः। सप्तम्यास्त्रल्। इद्यादिरहिता
त् किमादेः सप्तम्यंतात् त्रल् स्यात् स्वार्थे। कुत्र। तत्र। एतस्मिन्निति अत्र। अमुत्र। इदमो हः। अस्मा
त् सप्तम्यंतात् हः स्यात्। त्रलोऽपवादः। इह। किमोत्। किमः सप्तम्यंताद् अत्प्रत्ययः स्यात्। क्वा

ति। किमः क्वः स्यादिति किमः क्वो। क्व। त्रलपीष्यते। कुत्र। वा ह च छंदसि। कुतिहोः कु। कुह। सर्वैकान्यकिय
त्तदः काले दा। एभ्यः सप्तम्यंतेभ्यो दाप्रत्ययः स्यात्। कालेर्ष त्रलादेरपवादः। सर्वस्य सोन्यतरस्यां दि।
दाप्रत्यये सर्वस्य सो वा स्यात्। सदा। सर्वदा। एकदा। अन्यदा। कदा। यदा। तदा। काले किं। सर्वत्र देशे।
इदमो र्हिल्। अस्मात्सप्तम्यंतात्काले र्हिल्स्यात्। दस्यापवादः। एतेतौ रथोः। इदमो रेफे थका
रे च क्रमादेतइतौ देशौ स्तः। एतर्हि। काले किं। इह। पदे देशे। अधुना। इदमो रूपं निपात्यते। इदानीं च।
इदमो दानीं प्रत्ययः स्यात्काले। इदानीम्। तदो दा च। तदः सप्तम्यंताद्दा स्याद्दानीं च। काले। तदा।
तदानीम्। पुनर्दा विधेः फलं किं। अनद्यतने र्हिलन्यतरस्यां। किमादेः सप्तम्यंतादनद्यत
ने र्हिल्वा स्यात्। यर्हि। पक्षे यदा। सद्यः परुत्परार्यैषमः परेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्यु

रितरेद्युः परेद्युः अधरेद्युः अन्येद्युः उत्तरेद्युः । एते सप्तम्यंता कालविशेषे निपात्यंते । समाने ह्नि
सद्यः । इत्यादि । उभयद्युश्च । प्रकारवचने थाल् । सामान्यस्य भेदको विशेषः प्रकारः । तद्वृत्तेः कि
मादेस्थाल् स्यात् । सर्वप्रकारेण सर्वथा । यथा । तथा । इदमस्थमुः । अस्मात्थमुर्न थाल् । इत्थं
। किमश्च । अस्मात्थमुः स्यान्न थाल् । कथं । दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशका
ले । इत्यं । किं सप्तमीपञ्चमीप्रथमांतेभ्यो दिक्शब्देभ्यो दिगाद्यर्थेभ्यः स्वार्थे अस्तातिः प्रत्य
यः स्यात् । पूर्वाधरावराणामसि पुरधवश्चैषां । एभ्योऽस्तात्यर्थे असिप्रत्ययः स्यात् । तद्योगे
चैषां क्रमात् पुर अध अव इत्यादेशाः स्युः । अस्ताति च । अस्तातौ च परे पूर्वादीनां पुरादय आदेशा
:स्युः । पूर्वस्यां । पूर्वस्याः । पूर्वा दिक् पुरः । पुरस्तात् । अधः । अधस्तात् । अवः । अवस्तात् । विभाषा

वरस्या॥ अवरस्य अस्तातौ परे अवो वा स्यात्॥ अवस्तात्॥ अवरस्तात्॥ परस्तात्॥ अपरस्तात्॥ एवं देशे काले
वा॥ दक्षिणोत्तराभ्यामतसुच्॥ आभ्यामतसुच् स्याद्दिक्शब्दे॥ अस्तातेरपवादः॥ दक्षिणतः॥ उत्तरतः॥ विभा
षा परावराभ्यां॥ आभ्यामतसुच्वा स्यात्॥ परतः॥ अवरतः॥ पक्षेऽस्तातिः॥ अंचेर्लुक्॥ अंचत्यंताद्दिक्॥
पाद्धा नपरस्यास्तातेर्लुक् स्यात्॥ लुक् तद्धितलुकि॥ प्राच्यां॥ प्राच्याः॥ प्राची वा दिक्॥ प्राक्॥ उदक्
॥ एवं देशे काले वा॥ उपर्युपरिष्टात्॥ ऊर्ध्वशब्दस्यास्तात्यर्थे निपातनावेतौ॥ पश्चात्॥ अवरस्यास्ता
त्यर्थे निपातः॥ उत्तराधरदक्षिणादातिः॥ एभ्योऽस्तात्यर्थे आतिः॥ उत्तराद्वसतीत्यादि॥ एनम
न्यतस्यामदूरेपंचम्याः॥ सप्तमीप्रथमांतादुत्तराधरदक्षिणात एनब्वा स्यात्॥ अदूरेऽस्तात्य
र्थे॥ उत्तरेण॥ अधरेण॥ दक्षिणेन॥ पक्षे पूर्ववत् प्रत्ययाः॥ अपंचम्याः किम्॥ उत्तराद्यागतः॥ दि

प्र॰ सु॰ २२८ 1248

कुशब्द मात्रादेन वितिके यित्। पूर्वेण। दक्षिणादाच्।७ क्षेर्पे नतु पञ्चम्याः दक्षिणा। आहि
च दूरे। दक्षिणाहरे र्थे आहिः स्यात्। चकारादाच् न तु पञ्चम्याः॥ दक्षिणा। दक्षिणाहि। केला
साद्दमाति। उत्तेरीश्च। आजाही स्तः उत्तरा। उत्तराहि। संख्याया विधार्थे धा। क्रियाप्रकारवृत्ते
ः संख्यायाः स्वार्थे धा स्यात्। चतुः प्रकारा भुङ्क्ते चतुर्धा। एका द्वाध्यमुञन्यतरस्याम्। एकशब्दाद्धा
इत्यस्या ध्यमुञादेशो वा स्यात्। ऐकध्यं। एकधा। द्वित्र्योश्च धमुञ्। द्वित्र्योर्धा इत्यस्य धमु
ञ् स्यात्। द्वैधं। द्विधा। त्रैधं। त्रिधा। एधाच्च। द्वित्र्योर्धा इत्यस्यैधाच् स्या च्या द्वा। चकारो विकल्पा

राम १२८

नुकर्षः। द्वेधा। त्रेधा। पृथ्येऽत्वमिति त्वष्टु त्वेवा। षोढा। षड्धा। याप्ये पाशप्। कुत्सितेर्थे प्रा
तिपदिकात् पाशप् स्यात्। कुत्सितो भिषक् भिषक्पाशः। सोपदा। अपदा। द्वेधाकुधोः प

रयोर्विसर्गस्य सः स्यात्। पाशकल्पककाम्येषु वाच्यः। पयस्पाशं। पदादेरनु पयः पिबति। अनव्ययस्य वा
च्यः। नेह प्रातष्पाशम्। इणः षः। इणः परस्य विसर्गस्य षः स्यात्। कुर्याः। सर्पिष्पाशम्। पूर
णाङ्गोतीयादन्त्रा पूरणात्रीयादन्तस्याङ्गो। स्वरेभेदः। द्वितीयो भागः द्वितीयः। त्रितीयः। प्राग्।
कादशभ्योऽछंदसि। पूरणाङ्गोऽन्त्यस्याङ्गोकादशभ्यः। नतु छंदसि। चतुर्थः। दशमः। षष्ठा
ष्टमाभ्यांजयो। आभ्यांजः स्यात्प्रकारादन्त्रा। षष्ठः। षाष्ठः। अष्टमः। आष्टमः। भूतपूर्वे चरट्। भूत
पूर्व आढ्यः। आढ्यचरः। षष्ठ्या रूप्य च। षष्ठ्यन्ताद्भूतपूर्वे रूप्यः स्यात्। चरट्। कृष्णस्य भूतपूर्वो
गोः कृष्णरूप्यः। रूप्यान पुंवदिति केचित्। शुभ्रारूप्याः। कृष्णचरः। अतिशायने तमविष्ठनौ।
प्रकर्षेप्येतौ स्तः। रिलोपः। अयमेषामतिशायेन लघुर्लघुतमः। लघिष्ठः। तिङश्च। तिङंता

त्प्रकर्षे यतमप्स्यात्। पचतितमां। द्विवचनविभज्योपपदे तरबीयसुनौ। द्वयोरेकस्यातिशये
विभज्ये चोपपदे सुप्तिङन्तादेतौ स्तः। प्राकर्ष्ये। पूर्वयोरपवादः। अयमनयोरतिशयेन लघुः ल
घुतरः। लघीयान्। विभज्योपपदे तु दाक्ष्याः प्राच्येभ्यः पटुतराः पटीयांसः। अजादी गुणवचनादे
व। इष्ठन्नीयसुनौ गुणवचनादेव स्तः प्राग्विषयाः। प्रणीयान्। नेह। पाचकतरः। पाचकतमः। त
रप्तमपौ घः। एतौ घसंज्ञौ स्तः। किमेत्तिङव्ययघादाम्बद्रव्यप्रकर्षे। किमेदन्तात्तिङोऽव्ययाच्च
यो घस्तदन्तादामुः स्यान्न तु द्रव्यप्रकर्षे। किंतरां। प्राह्णेतरां। पचतितरां। उच्चैस्तरां। एवं किंत
मामित्यादि। स्वरादित्वादव्ययत्वं। द्रव्यप्रकर्षे तु उच्चैस्तरस्तरुः। तुश्छंदसि। तृन्तृजन्ताभ्यामि
ष्ठन्नीयसुनौ स्तः छंदसि। भाषायामपीति केचित्। तुरिष्ठेमेयस्सु। तृशब्दस्य लोपः स्यादिष्ठेमे

यस्त्वा करिष्ठः। दोहीयसी धेनुः। प्रशस्यस्य श्रः। अस्य श्र आदेशः स्यादजाद्योः प्रकृत्यैकाच्। इष्ठादाव
काच् प्रकृत्या स्यात्। श्रेष्ठः। श्रेयान्। ज्य च। प्रशस्यस्य ज्य आदेशः स्यात्। इष्ठेयसोः। ज्येष्ठः। ज्यादादीय
सः। ज्यात्परस्य ईयस आकारादेशः स्यात्। आदेः परस्य। ज्यायान्। वृद्धस्य च। वृद्धस्यापि ज्यादेशः।
इष्ठेयसोः। नै अतिशयेन वृद्धः। ज्यायान्। ज्येष्ठः। अन्तिकबाढयोर्नेदसाधौ। तयोः क्रमादेतावा
देशौ स्तः। इष्ठेयसोः। नेदिष्ठः। नेदीयान्। साधिष्ठः। साधीयान्। स्थूलदूरयुवह्रस्वक्षिप्र
क्षुद्राणां यणादिपरं पूर्वस्य च गुणः। एषां यणादिपरं लुप्यते पूर्वस्य च गुणः स्यादिष्ठेमेयस्सु
परेषु। स्थविष्ठः। दविष्ठः। यविष्ठः। ह्रसिष्ठः। क्षेपिष्ठः। क्षोदिष्ठः। एवमीयसि। ह्रस्वक्षिप्र
क्षुद्राणां पृथ्वादित्वात्। ह्रसिमा। क्षेपिमा। क्षोदिमा। प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदी

र्घवृंदारकाणांप्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृंदाः ।। प्रियादीनांक्रमात्प्रादयआदेशाः स्युः । इष्ठेमे
यस्सु । प्रेष्ठः । स्थेष्ठः । स्फेष्ठः । वरिष्ठः । बंहिष्ठः । गरिष्ठः । वर्षिष्ठः । त्रपिष्ठः । द्राघिष्ठः । वृंदिष्ठः । एवमी
यसि प्रियोरुबहुलगुरुदीर्घाणांप्रिम्णादि । वास्येमा । इत्यादि । बहोर्लोपोभूचबहोः । बहोः परयोरिम
यसोरादेर्लोपः स्यात् । बहोश्चभूरादेशः । भूमा । भूयान् । इष्ठस्ययिट्च । बहोर्भूरादेशः स्यात् इष्ठस्या
देर्लोपस्तस्य च यिडागमः । भूयिष्ठः । युवाल्पयोः कनन्यतरस्यां । एतयोः कनादेशो वा स्यादिष्ठेयसोः
। कनिष्ठः । कनीयान् । पक्षेयविष्ठः । अल्पिष्ठः । इत्यादि । विन्मतोर्लुक् । विनोमतुपश्च लुक् स्यादिष्ठे
यसोः । अतिशयेनस्रग्वीस्रजिष्ठः । स्रजीयान् । अतिशयेनत्वग्वान्त्वचिष्ठः । त्वचीयान् । प्रशं
सायांरूपप् ।। प्रशस्तः पटुः पटुरूपः । [illegible]स्त्वेनेति ङंतादपि । पचतिरूपं । क्लीबत्वं लोकात् । ई

षदसमाप्तौकल्पब्देश्यदेशीयरः। सुबिङन्तादीषदूनतायामेते स्युः। ईषदूनो विद्वान् विद्वत्क
ल्पः। यशस्कल्पं। यजुष्कल्पं। विद्वद्देश्यः। विद्वद्देशीयः। पचतिकल्पं। विभाषा सुपो बहुच् पुरस्ता(
त्तु। सुबन्तात् बहुच् वा स्यात् स चाग्रे। ईषदूनः पटुः बहुपटुः। पटुकल्पः। सुपः किं। यजतिक
ल्पं। प्रकारवचने जातीयर्। षष्ठ्यन्तात् प्रकारवति चायं। पटुप्रकारः पटुजातीयः। प्रकारवति चायं स्यात्। पाललप्रकामात्र।
घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योनेकाचो ह्रस्वः। ङ्यन्तस्यानेकाचो ह्रस्वः स्यात्। ब्राह्मणि
। ब्राह्मणितरा। ब्राह्मणितमा। ब्राह्मणिरूपेत्यादि। उक्तपुंस्कादिति वा नेह। आमलकीतरा। नद्याः
शेषस्यान्यतरस्याम्। अङ्यन्तनद्याः घेषु तेष्वेकाचो ह्रस्वो वा स्यात्। श्रीतरा। वामोरूतरा। स्त्रितरा
। स्त्रीतरा। एवं तमबादि। कृन्नद्याः प्रतिषेधः। लक्ष्मीतरा। तन्त्रीतरा। उगितश्च। उगितो नद्या